॥ रासलीला नाम प्रेक्षणकम् ॥

श्री डाक्टर् वे. राघवशर्मणा सन्दृब्धम्

प्रत्येकं पुरुषोत्तमः स भगवान् जीवात्मनो नायिका
नेतेवोपगतः सदा रसमयीं लीलां नरीनर्ति यत् ।
तत्तत्त्वप्रतिबोधकः शुकमुखोद्गीतो हरेर्योऽद्भुतो
गोपीरासविलास एष स बुधैर्नाट्येऽर्पितो रस्यताम् ॥

स्ववाक्यपत्राण्यायोज्य शुकश्लोकसुमैस्सह ।
जुगुंफ राघवो रासलीलां वन्यामिव स्रजम् ॥

प्रथमं प्रेक्षणकम्

ग्रान्थिकः — (मायामालवगौलरागेण)

भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः ।
वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः ॥[1]

" (पूर्णचन्द्रिकारागेण)

तदोडुराजः ककुभः करैः मुखं प्राच्या विलिम्पन्नरुणेन शन्तमैः ।
स चर्षणीनामुदगाच्छुचो मृजन् प्रियः प्रियाया इव दीर्घदर्शनः ॥[2]

" (मनोहरीरागेण)

दृष्ट्वा कुमुद्वन्तमखण्डमण्डलं रमाननाभं नवकुंकुमारुणम् ।
वनं च तत् कोमलगोऽभिरञ्जितं जगौ कलं वामदृशां मनोहरम् ॥[3]

(कामवर्धनीरागं भगवान् वेणुना वादयति)

(कामवर्धनीरागेण)

---

* १९४३ डिसंबर-मासि मद्रपुरी-आकाशवाणी-रङ्गे प्रयुक्तमेतत् ।

१. श्रीमद्भागवते १०. पू. २९. १, २. १०. पू. २९. २. ३. १०. पू. २९. ३.

निशम्य गीतं तद् अनङ्गवर्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः ।
आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कान्तो जवलोलकुण्डलाः ॥[४]

(ततः प्रविशन्ति यथानिर्दिष्टा गोप्यः)

गोप्यः — (हुशानीरागेण)

(अन्योन्यम्) हन्त चित्रमबलाः शृणुतेदं हारहास उरसि स्थिरविद्युत् ।
नन्दसूनुरयमार्तजनानां नर्मदो यर्हि कूजितवेणुः ॥[५]

ग्रान्थिकः —(गद्यम्; पाठ्येन) आः ! दुहन्त्यः काश्चित् त्यक्तदोहाः इतः कृष्णमभिसरन्ति । हन्त ! इतः शिशून् पाययन्त्यः शिशूनपि हित्वा प्रव्रजन्ति । इतश्च काश्चित् प्रयान्ति सन्न्यस्तपतिशुश्रूषाः, अपरा अनपेक्षितभोजनाः, पुनरन्याश्च व्यत्यस्तवस्त्राभरणा अपि कृष्णान्तिकमाकृष्यन्ते॥[६]

,, (मोहनरागेण)

ता वार्यमाणाः पतिभिः पितृभिः भ्रातृबन्धुभिः ।
गोविन्दापहृतात्मानो न न्यवर्तन्त मोहिताः ॥
तमेव परमात्मानं संगताः क्षीणबन्धनाः ।
ता दृष्ट्वा भगवानाह वाचःपेशैर्विमोहयन् ॥[७]

कृष्णः —(पाठ्येन) स्वागतं वो महाभागाः ! प्रियं किं करवाणि वः ।
व्रजस्यानामयं कच्चित् ? ब्रूतागमनकारणम् ॥
रजन्येषा घोररूपा ! प्रतियात सुमध्यमाः ।
पतयो वो विचिन्वन्ति शुश्रूषध्वं पतीन् सतीः ॥[८]

प्रथमा गोपी — (नायिका [नायकी] रागेण)

मैवं विभोऽर्हति भवान् गदितुं नृशंसं
संत्यज्य सर्वविषयांस्तव पादमूलम् ।

---

४. १०. पू. २९. ४. ५. १०. पू. ३५. ४. ६. १०. पू. २९. ५-७
७. तत्रैव ८. ११. १७. ८. तत्रैव १८. १९. २०. २२.

भक्ता भजस्व दुरवग्रह मा त्यजास्मान्
देवो यथादिपुरुषो भजते मुमुक्षून् ॥ [९]

द्वितीया गोपी-- (सहानारागेण)

प्रेष्ठो भवान् तनुभृतां किल बन्धुरात्मा
कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मन् ।
तन्नः प्रसीद परमेश्वर मा स्म छिन्द्या
आशां भृतां त्वयि चिरादरविन्दनेत्र ॥ [१०]

ग्रान्थिकः— (यमुनाकल्याणीरागेण)

इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः ।
प्रहस्य सदयं गोपीरात्मारामोऽप्यरीरमत् ॥
नद्याः पुलिनमाविश्य गोपीभी रेम ईश्वरः ॥ [११]

द्वितीयं प्रेक्षणकम्

(ततः प्रविशन्ति यमुनापुलिनगताः कृष्णः गोप्यश्च)

प्रथमा गोपी—कृष्ण ! त्वमित उपविष्टो वेणुं वादय, वयं ते वनमालां संग्रथ्य त्वामलंकरिष्यामः ।

कृष्णः — यूयम् एकैका एकैकं पुष्पमाहृत्य अस्यै प्रयच्छत ; इयं चतुरा मदन्तिकोपविष्टा वैजयन्तीं मालां क्षणेन गुंफिष्यति ।

द्वितीया गोपी—तथा । त्वमपि प्रवाहय ते अधरपल्लवाद् वांशिकामृतम् ।

(यमुनाकल्याणीरागं भगवान् वेणुना वादयति)

प्रथमा गोपी—कृष्ण ! ग्रथितैव ते वनमाला । अर्पयामश्च ते कण्ठे । अपि मनोहरेयं माला ?

कृष्णः— अस्या रामणीयकं किमिति वक्ष्यामि ?

---

९. तत्रैव ३१. १०. तत्रैव ३१-३३. ११. तत्रैव ४२. ४५.

प्रथमा गोपी— इयं मल्लिका मया आहृता ।

द्वितीया गोपी— इयं वनज्योत्स्ना ; एनामतिदूरं गत्वा अहमानयम् ।

तृतीया गोपी— इयं तुलसी, मम उपहारः ।

कृष्णः — अहो प्रियतमाः ! पुष्पं वा पत्रं वा सर्वमेव सर्वाभिरपि युष्माभिः आहृतम् एकैकमपि परमं सुन्दरं मे । स्वं स्वम् आत्मानमिव यूयम् उच्चित्य मह्यमर्पितवत्यः । यत् सत्यमद्य न पुष्पमालां, किन्तु भवतीनामात्ममालामेव हृदयेन वहामि । अनया च पूर्णश्रीरेष राजेऽहम् ॥

प्रथमा गोपी— ननु मम त्वं कृष्ण !

द्वितीया गोपी— हुम् ! ममैवासि ।

तृतीया गोपी—न हि, ममैव ।

कृष्णः—सर्वा एव यूयं मे प्रत्येकं प्रेष्ठाः ।

गोप्यः—अहो नः सौभाग्यम् ! नूनं सर्वाभ्योऽपि भुवि वयमभ्यधिकाः ![12]

(इति वदन्तीभिः गोपीभिस्सह रासमण्डलमध्यगतो भगवान् वंशीं वादयन् नृत्यति)

गोप्यः — (कमाशुरागेण)

त्रिभुवनप्रभोः प्रेमलाभतः त्रिभुवने वयं सर्वतो वराः ।
भुजलतासु नः प्राप्य बन्धनं क्व नु कथं भवानपगमिष्यति ॥

ग्रान्थिकः — (अठानारागेण द्रुतलयेन)

तासां तत्सौभगमदं वीक्ष्य मानं च केशवः ।
प्रशमाय प्रसादाय तत्रैवान्तरधीयत ॥[13]

---

१२. तत्रैव, ४७. १३. तत्रैव ४८.

तृतीयं प्रेक्षणकम्

ग्रान्थिकः — (मुखारीरागेण विलम्बलयेन)

अन्तर्हिते भगवति सहसैव व्रजाङ्गनाः ।
अतप्यंस्तमचक्षाणाः विचिक्युश्च वनाद्वनम् ॥[१४]

(ततः प्रविशन्ति यथानिर्दिष्टा गोप्यः)

प्रथमा गोपी—भोः साल ! सालभुजस्त्वया दृष्टो नन्दसूनुः ?[१५]

द्वितीया गोपी—अयि तमाल ! तमालनीला सुषमा कापि ते पथा गता किम् ?

तृतीया गोपी—(वंशस्येव ध्वनिः) हन्त ! इतो गायति वंशीमोहनः । एनमुपधावामि । हा धिक् ! एष कीचको मारुतापूरितो रौति ।

चतुर्थी गोपी—नन्वितो यमुनाविहारी कालियफणारङ्गे नृत्यन् विराजते, एषाहमुपधावाम्येनम् । हन्त ! कथमियं नः प्रियसख्येव काचित् कालियलीलां नाटयन्ती आत्मानं कृष्णमयतां नयति !

ग्रान्थिकः — (भैरवीरागेण विलम्बलयेन)

इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः ।
लीला भगवतस्तास्ता अनुचक्रुस्तदात्मिकाः ॥[१६]

(पाठयेन)

तैस्तैः पदैस्तत्पदवीमन्विच्छन्त्योऽग्रतोऽबलाः ।
वध्वाः पदैः सुपृक्तानि विलोक्यार्तास्समब्रुवन् ॥[१७]

प्रथमा गोपी—हला, सख्यः ! इतः पश्यत ! कयापि गोप्या अपक्रम्य एकान्तमेत्यात्र विहृतवतो भगवतः पदान्येतानि । अहो धन्या सा गोपिका, या ऐकान्तिकी तेन रमते । .....

[१४. १०. पू. ३०. १. ४. १५. तत्रैव ४. २४. १६. तत्रैव १४. १७. तत्रैव. २६.

हा कष्टम्! इतो दृश्यते सा। कथमुद्धृतैकपदा विषमं तिष्ठति! तदुपसृत्य पृच्छामः। .....[१८]

(ततः प्रविशति यथानिर्दिष्टा गोपिका)

हला! क्व स गतो मायामोहनः? कथमेवं निःश्वसती तेन त्यक्ता? किमर्थमेवमुद्धृतैकपददुःस्थितिमनुभवसि?

गोपिका—सख्यः! कृष्णप्रेमसौभाग्येन यदा यूयं मत्ताः, तदा युष्मान् विहाय मामेकामेव स्वबाहुभ्यामादाय इत एकान्तभोगाय अपयातो नो वल्लभः। चिक्रीड च मया।[१९] ततः.....।

(इत्यर्धोक्ति मुह्यति)

गोप्यः—हला! समाश्वसिहि। ब्रूहि, किं ततः परं निर्वृत्तमिति।

गोपिका—ततः परं मामपि मद आविशत्।

(चक्रवाकरागेण)

अहं मेने तदात्मानं वरिष्ठं सर्वयोषिताम्।
हित्वा गोपीः कामयाना मामसौ भजते प्रियः॥
ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवम्।
न पारयेऽहं चलितुं नय मां यत्र ते मनः।
एवमुक्तो मया प्राह स्कन्ध आरुह्यतामिति॥[२०]

(पाठ्येन)

हा धिक्! जानामि तं मम उद्वहनाय अवनमन्तम्, मामपि तदुपरि आरोहाय पदमुत्क्षिपन्तीम्। तादृश्येव समुद्धृतपदा अद्याप्यत्र तिष्ठामि, स तु अवनतः कुतोऽन्तर्हितो मायी इति न जाने।[२१]

---

१८. तत्रैव २७. ३०. १९. तत्रैव ३१. ३२. २०. तत्रैव ३६-३८. २१. तत्रैव ३८-४०.

ग्रान्थिकः — (असावेरीरागेण)

तया कथितमाकर्ण्य मानप्राप्तिं च माधवात् ।
अवमानं च दौरात्म्याद् विस्मयं परमं ययुः ॥
तन्मनस्कास्तदालापाः तद्विचेष्टास्तदात्मिकाः ।
तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरुः ॥
पुनः पुलिनमागत्य कालिन्द्याः कृष्णभावनाः ।
समवेता जगुः कृष्णं तदागमनकांक्षिताः ॥[२२]

चतुर्थं प्रेक्षणकम्

(ततः प्रविशन्ति कालिन्दीपुलिनगता गायन्त्यो गोप्यः)

प्रथमा गोपी— (नाथरामक्रियारागेण)

जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि ।
दयित दृश्यतां दिक्षु तावकाः त्वयि धृतासवः त्वां विचिन्वते ॥[२३]

द्वितीया गोपी— (आहिरीरागेण)

न खलु गोपिकानन्दनो भवान् अखिलदेहिनामन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये सख उदेयिवान् सात्वतां कुले ॥[२४]

तृतीया गोपी— (पुन्नागवरालीरागेण)

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम् ।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः ॥[२५]

ग्रान्थिकः — (नीलाम्बरीरागेण)

इति गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च चित्रधा ।
रुरुदुः सुस्वरं हन्त कृष्णदर्शनलालसाः ॥[२६]

(पाठ्येन)

एवमासां विरहितानां ज्वलति शोकानले, भस्मीभूते माने, पुनश्च निर्मलीभूते अन्तःकरणमुकुरे-

---

२२. तत्रैव ४१. ४३. ४४. २३. १०. पू. ३१. १. २४. तत्रैव ४. २५. तत्रैव ९. २६. १०. पू. ३२. १.

(भूपालरागेण)

तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः ।
पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥[२७]

(ततः प्रविशति यथानिर्दिष्टो भगवान्)

ग्रान्थिकः — (बिलहरीरागेण)

तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः ।
उत्तस्थुर्युगपत्सर्वाः तन्वः प्राणमिवागतम् ॥
व्यरोचत वृतस्ताभिः पुरुषः शक्तिभिर्यथा ॥[२८]

(कापीरागेण)

तत्रारभत गोविन्दो रासक्रीडामनुव्रतैः ।
स्त्रीरत्नैरन्वितः प्रीतैः अन्योन्याबद्धबाहुभिः ॥[२९]

(कुन्तलवरालीरागेण)

अङ्गनामङ्गनामन्तरे माधवः माधवं माधवं चान्तरेणाङ्गना ।
इत्थमाकल्पिते गोपिकामण्डले सञ्जगौ वेणुना देवकीनन्दनः ॥[३०]

(यथानिर्दिष्टं रासमण्डले नृत्यति भगवान्)

गोप्यः —

जयति कृष्ण ते वेणुवादनं श्रुतिसुखावहं सामसारदम् ।
जयति कृष्ण ते हसितमद्भुतं हृदयशर्वरीचन्द्रिकायितम् ॥
जयति कृष्ण सत्-चित्-सुखो भवान् परमपूरुषो नायकोत्तमः ।
नायिकानिर्भैर्निखिलजीविभिः जयति ते सदा रासनर्तनम् ॥

ग्रान्थिकः — (मध्यमादिरागेण)

रेमे रमेशो व्रजसुन्दरीभिः यथार्भकः स्वप्रतिबिंबविभ्रमः ॥[३१]

(सुरटीरागेण)

गोपीनां तत्पतीनां च सर्वेषामेव देहिनाम् ।
योऽन्तश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक् ॥[३२]

॥ इति श्री राघवशर्मसन्दृब्धं रासलीलाप्रेक्षणकं संपूर्णम् ॥

---

२७. तत्रैव ३२. २. १८. तत्रैव ३. १०. २९. १०. पू. ३३. २. ३०. कृष्णकर्णामृतात्. ३१. १०. पू. ३३. १७.३२. तत्रैव ३६.

कुचेलवृत्तं नाम सङ्गीतप्रेक्षणकम्

देवकी मेनन्

॥ प्रथमोऽङ्कः ॥

(नेपथ्ये मङ्गलश्लोकौ गीयेते)

अवतारैर्यथाकालं धर्मरक्षां करोति यः ।
तं वन्दे मुरलीगानलोलं गोकुलबालकम् ॥

द्वारकेशं दयासिन्धुम् वारिजापरिसेवितम् ।
पारिजातं प्रपन्नानाम् प्रणमामि मुहुर्मुहुः ॥

(ततः प्रविशति मद्रपुर्यां मेरीराज्ञीकलाशालायाः नाट्यविभागस्य कार्यदर्शिनी कलावती नाम विद्यार्थिनी)

कलावती—(नेपथ्याभिमुखमवलोक्य)

सखि प्रभावति ! त्वरितमागम्यताम् ।

(ततः प्रविशति प्रभावती संस्कृतविभागस्य कार्यदर्शिनी)

प्रभावती—सखि ! इयमस्मि ।

कलावती—त्वयाद्य कलाशालायाः वार्षिकोत्सवे गैर्वाण्यां किं वा प्रदर्शनं सज्जीकृतम् ?

प्रभा०—कुचेलवृत्तं नाम प्रेक्षणकम् ।

कला०—सखि ! नाहं देवभाषाभिज्ञा । तथाप्येतद्वक्तुकामास्मि । पुराणवस्तुनि कुचेलवृत्ते का वाभिरुचिः स्यादाधुनिकानाम् । नवनववस्तुरताः हीदानीन्तनाः ।

प्रभा०—सखि ! न मया यथेष्टं स्वीकृतमेतत्प्रेक्षणकम् । परं तु तत्रभवतीभ्यां अस्माकं कलाशालाध्यक्षया, संस्कृतोपाध्यायिन्या च नियुक्तास्म्येतस्मिन् प्रयोगे । अपरं च, एतत्प्रेक्षणकम् अस्मत्संस्कृतविभागस्य पूर्वाध्यापिकया नवीनरीत्या रचितम् । तन्मा भूत्ते आशङ्का ।

ग्रा

पुराणमित्येव न मन्दशोभं
न चापि सर्वं नववस्तु हृद्यम् ।
प्राचीनवस्त्वाश्रितमप्यनिन्द्यं
मार्गे नवीने प्रसृतं हि काव्यम् ॥

कला०--सखि ! अस्ति मे कौतूहलम् । कीदृशी सा नवीना रीतिः ?

प्रभा०--ननु जानासि आङ्गलभाषायां ओपेर (opera) इति प्रतिद्धः प्रचुरसङ्गीतविशिष्टो नाटकाभिनयः । एतत्सरण्या निबद्धा खलु प्रस्तुता कृतिः ।

कला०—सखि ! न त्वं केवलं प्रभावती, किंतु प्रतिभावती च । तत्तवास्मिन्नुद्योगे विजयं प्रति न मे विद्यते सन्देहः ।

(मणिबन्धघटितसुवर्णघटिकां निरीक्ष्य)

सखि ! अल्पो हि समयोऽवशेषित उत्सवारम्भाय । तद्गच्छामि । त्वमप्येहि शीघ्रम् ।

प्रभा०--तथा । (निष्क्रान्ता कलावती)

प्रभा०—(सावेगं) न मया न कृतः प्रयत्नः कुचेलवृत्तस्य नूतनाभिनय-विषये । तथापि न मे मनः प्रत्येति कार्यसिद्धिं प्रति । तद्विद्वांसः सामाजिकाः विद्यार्थिनीनामस्माकम् अभिनयवैकल्यानि क्षमया मर्षयन्त्विति सप्रश्रयं प्रार्थये ।

यथा हि देवदेवेन शबर्याः खादिते फले ।
क्षुद्रे च पृथुके सख्युः परा प्रीतिः प्रदर्शिता ॥
तथा सामाजिकैः सद्भिः सक्षमैश्च हितैषिभिः ।
न्यूनेऽप्यस्मत्समुद्योगे प्रीतिरत्र प्रदर्श्यताम् ॥

(निष्क्रान्ता)

॥ प्रस्तावना ॥

(कुचेलस्य जीर्णगेहस्यैकदेशे भगवदाराधनस्थानम् । ततः प्रातः प्रविशन्ति दुर्बलाः कुचेलपुत्राः भगवद्भजनाय)

ग्रा

(गानम् - आरभिरागेण)

जय जय देव दयापर सुन्दर ।
जय निजलीलापूतवसुन्धर ॥

देवकीतनय द्वारकानिलय ।
देव दयालय मां परिपालय ॥
जय, जय ।

सरसिजनयन दरस्मितवदन ।
वरमणिमण्डलमण्डितमण्डन ॥
जय, जय ।

नवजलधरश्यामानवमहाराभिराम ।
नवरससुललित अव रमाराम ॥
जय, जय ।

मधुरमुरलीगान-मधुरसपाने ।
मधुकरायते मतिर्मम मधुराजने ॥
जय, जय ।

ललितगोपीजनाकलितपादार्चन ।
गलितपापानिमान् कलय जनार्दन ॥
जय, जय ।

(निष्क्रान्ताः सर्वे)

॥ द्वितीयोऽङ्कः ॥

नेपथ्ये—

प्रातराराध्य बालास्ते मुरारिमघनाशनम् ।
प्राधावन् प्रातराशार्थं मातुर्निकटमुत्सुकाः ॥

(कुचेलगेहे महानसम्)

(ततः प्रविशति प्रातः स्नाता भूमावुपविष्टा पूजार्थं पुष्पमालां गुम्फन्ती कुचेलपत्नी । बुभुक्षिताः पुत्राश्च तन्निकटं धावन्ति ।)

ग्रा

पुत्राः सर्वे—अम्ब! भगवदाराधनं समाप्तम्। बुभुक्षिताः खलु वयम्।

(गानम्-कापिरागेण)

प्रथमो बालः—(मातरमालिङ्ग्य)—

मोदकं देहि मह्यम्, अम्ब! मोदकं देहि मह्यम्।
मोदकं यदि नास्ति गेहे खादितुं किमपि देहि॥

द्वितीयः—(परिक्रम्य)

मोदकं नास्ति चेद्दीयताम्।
ओदनं पयसा परं शोभनम्॥

तृतीयः (रुदन्) ओदनं नास्ति चेद्दीयतां सत्वरम्।
खादितुं किञ्चिदम्ब वरम्—यत्किञ्चिदम्ब! वरम्

चतुर्थेन सह इतरे बालाः (भाजनानि रिक्तानि विलोक्य)

(धन्यासिरागेण)

अम्ब देहि कुमाराणामस्माकं मिष्टभोजनम्।
न वयं क्षुधया तप्ताः भुवि जीवितुमुत्सुकाः॥

कुचेलपत्नी— (उत्थाय, अश्रूणि प्रमृज्य स्वगतम्)

(मुखारिरागेण)

का माता विद्यते लोके मादृशी मन्दभागिनी।
या न शक्ता स्वपुत्राणां प्रियाणां परिपालने॥

क्लेशयामि कथं कान्तं विषयास्पृष्टचेतसम्।
श्रीपते! पाहि ते भक्तान् पुत्रांस्त्वच्चरणाश्रितान्॥

(निष्क्रान्ताः सर्वे)

॥ तृतीयोऽङ्कः ॥

(कुचेलगेहे पूर्वनिर्दिष्टं भगवदाराधनस्थानम्)

(ततः प्रविशति उपविष्टः कुचेलः जपमालाहस्तो भगवन्नाम जपन्)

नेपथ्ये——

इत्थं सती प्रतिदिनं परितापभारं
पुत्रोपजीवनकृते क्षमया वहन्ती ।
तस्मिन् दिने निजपतिं यदुनाथभक्तं
वक्तुं यथार्थमखिलं विधिना नियुक्ता ॥

(ततः प्रविशति पुष्पमालाहस्ता कुचेलपत्नी, कृष्णविग्रहे च मालामर्पयित्वा देवं प्रणम्य उत्तिष्ठति ।)

कुचेलः——(विषण्णवदनां पत्नीं वीक्ष्य सादरम्)

प्रिये! किमस्वस्थचित्ता इव वर्तसे । किं वक्तुकामासि?

पत्नी——आर्यपुत्र! मर्षयतु भवानप्रियनिवेदनम् । श्रूयतां तावत्——

(गानम्-हुसेनिरागेण आदितालेन)

प्राणनाथ पुण्यकीर्ते ज्ञाननिधे अखिलजग-
त्त्राणपरायणदेवप्राणमित्र नमोऽस्तु ते ॥
प्राणधारणायार्थना नूनमत्र न शोभना ।
दीनकारुण्यहीना अहो भुवि भूरिजनाः ॥
क्षुत्कृशा अतिदीना बाला हृत्परं मे खेदयन्ति ।
दुर्बला हि केलीष्वपि तत्परा न भवन्ति ॥
कामितवरदायकं कामसमं रमानाथम् ।
तान्तजनपोषणार्थं कान्त, गत्वाद्य नम तम् ॥

कुचेलः——(उत्थाय, पत्नीम् उपसृत्य प्रशान्तः सन्)

(गानम्-कल्याणीरागेण, त्रिपुटतालेन)

चारुचरिते शुभे कातरा मा भव ।
कारुणिकः साधुरक्षको माधवः ॥
मानधनादयो मानसमोहनाः ।
मा-रमणे रतिरामयशोषणा ॥

भक्तजनावनकृत्यपरे हरौ ।
वक्तव्यमत्र किं भद्रे मुरारौ ॥
प्रार्थनां किंतु ते व्यर्थां न करोमि ।
पार्थसखं यामि कृतार्थो भवामि ॥

पत्नी—(सहर्षम्) आर्यपुत्र !

मा गच्छ रिक्तपाणिस्त्वं भगवत्पादसन्निधिम् ।
तदाहरामि यत्किञ्चित् श्रीकान्तमुपसेवितुम् ॥

कुचेलः—प्रिये, साधूक्तं त्वया, तथा क्रियताम् ।

(निष्क्रान्ता पत्नी ।)

(कुचेलः जपमालां करे धृत्वा भगवन्तं स्मरन् तिष्ठति । पत्नी वस्त्रखण्डे बद्धं किञ्चित्पृथुकमादाय पुनः प्रविश्य भर्तुर्हस्तयोर्भक्त्या समर्पयति ।)

पत्नी—आर्यपुत्र !

अल्पं पृथुकमप्येतद् अनल्पफलदायिने ।
अच्युताय प्रदायास्मै भवेम च्युतकिल्बिषाः ॥

कुचेलः—प्रिये !

यद्वै भगवते दत्तम् भक्तेन श्रद्धयान्वितम् ।
माधवो हि प्रसन्नात्मा तदश्नात्यमृतोपमम् ॥

(निष्क्रान्तौ)

॥ चतुर्थोऽङ्कः ॥

नेपथ्ये—अथ स मुदितपत्न्या चीरखण्डे निबद्धं
किमपि पृथुकजातं गोपयन् बाहुमूले ।
अखिलमुनिभिरीड्यं द्रष्टुकामोऽब्जनेत्रं
महितसुरपुराभां द्वारकां प्रत्ययासीत् ॥

(द्वारकापुर्या राजपथः)

(ततः प्रविशति पथिकः कुचेलः)

कुचेलः—(परिक्रम्य)

नमो विश्वस्वरूपाय विश्वस्थित्यन्तहेतवे ।
विश्वेश्वराय विश्वाय गोविन्दाय नमो नमः ॥

नमो विज्ञानरूपाय परमानन्दरूपिणे ।
कृष्णाय गोपीनाथाय गोविन्दाय नमो नमः ॥

(निष्क्रान्तः)

(द्वारकापुर्यां रुक्मिणीदेव्या अन्तःपुरम्)

(ततः प्रविशति रुक्मिणीदेव्या सह आसनस्थः कृष्णः)

(कुचेलः प्रविश्य प्रासादस्य बहिर्द्वारि तिष्ठति)

कुचेलः—नमः कमलनेत्राय नमः कमलमालिने ।
नमः कमलनाभाय कमलापतये नमः ॥

रुक्मिणी—(कर्णं दत्त्वा, अङ्गुल्या निर्दिशन्ती)

आर्यपुत्र! पश्यतु भवान्, कोऽपि द्विजवरो भवन्तं स्तुवन् बहिर्द्वारि तिष्ठति ।

भृशं कृशाङ्गोऽपि महान्तरङ्गः
सुचेलहीनोऽपि रुचेरहीनः ।
कोऽयं द्विजातिस्त्वयि भक्तिनम्रः
सत्त्वं गुणो मूर्त इवाभ्युपैति ॥

(भगवान् कुचेलं दृष्ट्वा ससम्भ्रममासनादुत्थाय प्रत्युद्गन्तुं प्रवृत्तः ।)

रुक्मिणी—आर्यपुत्र! सम्भ्रान्त इव भवान् कुत्र गच्छति ?

(निष्क्रान्तः कृष्णः)

रुक्मिणी—अये! गतो भगवान् स्वयमेव द्विजमानेतुम् ।

(निष्क्रान्ता रुक्मिणी)

नेपथ्ये—

दृष्ट्वा द्वारमुपागतं द्विजवरं त्यक्तासनश्च स्वयं
गत्वा सत्वरमालिलिङ्ग सुहृदं सुस्मेरवक्त्राम्बुजः ।
हर्षोत्फुल्लमतिं वृतं च पुलकैर्भक्त्या च बद्धाञ्जलिं
नीत्वान्तःपुरमातिथेयममितं चक्रे कृपावारिधिः ॥

(ततः प्रविशति कुचेलहस्तमवलम्ब्य कृष्णः, अर्घ्यादिकमादाय रुक्मिणी, वृद्धः कञ्चुकी च)

कृष्णः—सखे कुचेल! अत्रार्धासनमलङ्करोतु भवान् ।

(कुचेलः अपसरति भक्त्या । कृष्णः अनिच्छन्तमपि कुचेलं बलादुपवेशयति पर्यङ्के । रुक्मिणी अतिथिं यथाविधि पूजयित्वा तालवृन्तेन वीजयति ।)

कञ्चुकी—(एतदवलोक्य साश्चर्यम्)

सेवमानो ह्यहं देव्या पुरे वार्द्धकमागतः ।
दृष्टपूर्वं न देवस्य भक्तवात्सल्यमीदृशम् ॥

(गानम्-कमाश्-रागेण आदितालेन)

कञ्चुकी—भाग्यवतां वरोऽयम्
जन्मजन्मकृतपुण्यमूर्तिरयम् भाग्यवतां वरोऽयम् ।
देवमुनिवराणामप्यसुलभं पदं
पावनचरितेन साधुनासादितम् भाग्यवतां वरोऽयम् ।
अर्धासनास्थितो विश्वनाथेन समम्
अर्घ्यपूजितः श्रिया वीजितः सादरम् भाग्यवतां वरोऽयम् ॥

(भगवान् कुचेलं तोषयति तयोर्गुरुकुलवासानुस्मरणेन)

(गानम्-काम्बोदिरागेण आदितालेन)

कृष्णः—शोभनवासरमेतदहो सखे ।
शोभनवासरमेतदहो सखे ॥

साधुसमागमनमतिक्रमनीयम् ।
तत्तु सुहृदो यदि किमु कथनीयम् ॥

उषितयोरावयोर्गुरुवरसद्मनि ।
स्मरति भवान् किं तानि दिनानि ॥

इन्धनार्थं सखे काननयानम् ।
सन्ततवर्षान्निशि व्यतियानम् ॥

मुनिवरेणावयोरथ परिमार्गणं ।
स्मरति भवान् किं तानि दिनानि ॥ शोभनवासरम् ।

(भगवतः सौहार्दप्रदर्शनेन भक्तिपरवशः अवचनः कुचेलः सन्तोषाश्रूणि विसृजति ।)

नेपथ्ये—निपीय वाक्यानि सुधामयानि
नाथेन विश्वस्य समीरितानि ।
आनन्दबाष्पैर्नवपुष्पकल्पै-
रर्चामिवादाद्विभुपादमूले ॥

नेपथ्ये—एवं मुकुन्देन परं सभाजितः
श्रिया समेतेन स विप्रसत्तमः ।
कथं नु दद्यां पृथुकं रमापते-
रिति प्रहृष्टोऽपि समाकुलोऽभूत् ॥
सद्योऽवगम्य भगवान् प्रणतार्तिहन्ता
भक्तोत्तमस्य हृदयं प्रहसन्नवोचत् ।

कृष्णः—"कच्चिन्न मेऽस्त्युपहृतं भवताद्य किंचित्
भक्तैर्जनैर्वत सखे किमदेयमस्ति ॥"

नेपथ्ये—एवं मुकुन्देन कृतानुयोगो
ह्रिया न दातुं स बभूव शक्तः ।
हरिश्च तस्मात् पृथुकं जहार
प्रदर्शयन् गोकुलबाललीलाम् ॥

(भगवान् लज्जयावनतमुखस्य कुचेलस्य बाहुमूलात् पृथुकं बलाद् हृत्वा, तस्मादेकं मुष्टिं करे धृत्वा भक्षयितुं प्रवृत्तः ।)

नेपथ्ये—अहो कुचेलः सुकृती यदस्य
जघास कृष्णः पृथुकस्य मुष्टिम् ।

(कृष्णः पृथुकस्य द्वितीयं मुष्टिं गृह्णाति)

नेपथ्ये—पुनश्च भोक्तुं पृथुके गृहीते
जग्राह पाणिं कमला स्वभर्तुः ॥

(रुक्मिणीदेवी भगवतः करं सहसा गृह्णाति । भगवान् सस्मितं विलोकयति ताम् ।)

रुक्मिणी—भगवन् ! अलमलमेकेन मुष्टिना ।
प्रतिप्रदातुमेकस्य मुष्टेरपि न मे श्रियः ।
भक्तेष्वमितवात्सल्यान्न मां विस्मर्तुमर्हसि ॥

नेपथ्ये—भक्तस्य दासत्वमुपेयुषाऽमुना
किं किं हितं नो कृतमार्तबन्धुना ।
यो येन भावेन मुकुन्दमीहते
तं तेन भावेन विभुश्च सेवते ॥

(निष्क्रान्ताः सर्वे)

॥ पञ्चमोऽङ्कः ॥

नेपथ्ये—नीत्वा निशामतिमुदा कृतभोजनः स
श्रीवल्लभेन सहितो महनीयधाम्नि ।
प्रातर्महीसुरवरः कृतनित्यकर्मा
त्रैलोक्यनाथमभिवन्द्य गृहं प्रतस्थे ॥

नेपथ्ये—किञ्चिद्दूरं गते तस्मिन् कान्तां सस्मार स द्विजः ।
कृपार्हां दीनवदनां गृहभारभरार्दिताम् ॥

(ततः प्रविशति राजपथे स्वगृहं प्रतिष्ठमानः कुचेलः ।)

कुचेलः—(परिक्रम्य, पर्याकुलस्तिष्ठन्)

अच्युतस्यान्तिकं गत्वा भार्योक्तं विस्मृतं मया ।
किं नु वक्ष्याम्यहं जायामाशाशतजिताशयाम् ॥

(परिक्रम्य, सविमर्शम्)

अथवा नैव मे युक्तं श्रेयःकाले हि शोचितुम् ।
कामं सम्पूर्णकामोऽहं सच्चिदानन्ददर्शनात् ॥

(परिक्रामति)

नेपथ्ये—मार्गे मुकुन्दस्य गिरं विभावयन्
सख्येन देवस्य समीपमेयिवान् ।
सन्तुष्टचेताः स गृहं प्रयान् मुदा
सद्यः सुसौधानवलोक्य विस्मितः

कुचेलः—(नातिदूरे स्वगेहस्थाने महासौधान् विलोक्य सविस्मयम्)

स्वप्नो नु माया नु मतिभ्रमो नु
पश्यामि सौधान् सुरसद्मरम्यान् ।

(परिक्रम्य, प्रासादाभिमुखः स्थित्वा)

रामा च रत्नोज्ज्वलचारुभूषा
साक्षादिव श्रीरिह मामुपैति ॥

(ततः प्रविशति अर्घ्यादिभिः सह भूषणाद्यैरलङ्कृता कुचेलपत्नी विस्मयाविष्टचेतसं स्वभर्तारं प्रणमति च ।)

नेपथ्ये—महिलालोकललामतां गता सा
कमलाजानिसखं प्रणम्य कान्तम् ।
अखिलेशातिकृपाकटाक्षपात्रं
सुरलोकोपममानिनाय सौधम् ॥

(निष्क्रान्तौ)

॥ षष्ठोऽङ्कः ॥

(कुचेलस्य प्रासादे महनीया चतुश्शाला)

(ततः प्रविशति कुचेलः पत्न्या सह ।)

कुचेलः—(सर्वतो विलोक्य साश्चार्यम्) प्रिये ! कुत एतत्सर्वम् ?

पत्नी—आर्यपुत्र ! श्रीपतेः करुणाकटाक्षादेव । श्रूयताम्—

मुकुन्दश्रीपदाम्भोजं ध्यायन्त्या पूर्ववासरे ।
साक्षात्पद्मालया दृष्टा पुलकाङ्कितया मया ॥

(गानम्-चेञ्चुरुट्टिरागेण रूपकतालेन)

पत्नी—वीक्षिता श्रीमाता-क्षणं वीक्षिता श्रीमाता
मङ्गलदेवतामन्दहसिता वीक्षिता ।
अरुणसरोरुहमास्थिता भासुरा ।
अरुणकोटिप्रभाभरितदिगन्तरा ॥ वीक्षिता ।
करपल्लवलसल्लीला कमला ।
वरमणिहारा रत्नकुण्डला ॥ वीक्षिता ।
करुणापूरितचारुकटाक्षा ।
शरणागतपरिपालनदक्षा ॥ वीक्षिता ।

कुचेलः—प्रिये ! किमसाध्यं भगवतः ? परन्तु

अनित्यसुखदं लोकमिमं प्राप्य विरागिणः ।
भजन्ते तं परात्मानं सन्तोऽनन्तसुखाप्तये ॥

नेपथ्ये—(मृदङ्गध्वनिः)

पत्नी—अये ! श्रूयते वाद्यघोषः । मन्ये अस्मत्पुत्राः इतरबालैः सह श्रीजयन्त्याघोषाय नृत्तमभ्यसितुमत्रैवायान्तीति । तत्तान् प्रोत्साहयाव ।

(कुचेल आसने उपविशति, पत्नी तन्निकटे तिष्ठति । ततः प्रविशन्ति उत्साहभरिता बाला नृत्तार्थं वाद्यैः सह । बालेषु केचित् गीतसहितं वाद्यं वादयन्ति, अपरे च नृत्तं कुर्वन्ति ।)

(नृत्तं, गानम्-वसन्तरागेण)

पाहि परात्पर लोकहितंकर
गोकुलसुन्दर दुःखहर ।
पाहि पीताम्बर गोवर्धनधर
पाहि कृपाकर चक्रधर ॥
गोपवधूजनकेलीरञ्जन
मुरलीवादनहृष्टवदन ।
देवकीनन्दन दुर्जनभञ्जन
दुरितविमोचन दरहसन ॥
सज्जनमानसनर्तनरङ्ग
प्रेमतरङ्ग कमलाङ्क ।
नवरसविलसल्लीलापाङ्ग
श्रीवत्साङ्क विमलाङ्ग ॥

(निष्क्रान्ताः सर्वे)

॥ सप्तमोऽङ्कः ॥

(कुचेलस्य वासभवनस्य निकटे मङ्गलदीपादिभिः प्रशोभितं श्रीकृष्णमन्दिरम् ।)

(ततः प्रविशति कुचेलः ध्यानस्थः ।)

नेपथ्ये—श्रीलालितोऽपि धनदस्य पदं गतोऽपि
श्रीकृष्णपादभजनैकपरः सुदामा ।
निस्संगतैव सुलभेऽपि महार्थजाते
तस्याभवत् सरसिजाक्षमहाप्रसादात् ॥

(ततः प्रविशन्ति कुचेलपत्नी, पुत्राश्च भगवन्तं पूजयितुम् । कुचेलः ध्यानाद्विरमति । ते यथाविधि पूजां कृत्वा गायन्ति ।)

(मङ्गलगानम्-मणिरंगुरागेण रूपकतालेन)

देवकीसुत देवदेव महावतार ते मङ्गलम् ।
देवमुनिनरभूतजातकृपाकर जय मङ्गलम् ॥

(नृत्तं, गानम्-वसन्तरागेण)

पाहि परात्पर लोकहितंकर
गोकुलसुन्दर दुःखहर ।
पाहि पीताम्बर गोवर्धनधर
पाहि कृपाकर चक्रधर ॥
गोपवधूजनकेलीरञ्जन
मुरलीवादनहृष्टवदन ।
देवकीनन्दन दुर्जनभञ्जन
दुरितविमोचन दरहसन ॥
सज्जनमानसनर्तनरङ्ग
प्रेमतरङ्ग कमलाङ्क ।
नवरसविलसल्लीलापाङ्ग
श्रीवत्साङ्क विमलाङ्ग ॥

(निष्क्रान्ताः सर्वे)

॥ सप्तमोऽङ्कः ॥

(कुचेलस्य वासभवनस्य निकटे मङ्गलदीपादिभिः प्रशोभितं श्रीकृष्णमन्दिरम् ।)

(ततः प्रविशति कुचेलः ध्यानस्थः ।)

नेपथ्ये—श्रीलालितोऽपि धनदस्य पदं गतोऽपि
श्रीकृष्णपादभजनैकपरः सुदामा ।
निस्संगतैव सुलभेऽपि महार्थजाते
तस्याभवत् सरसिजाक्षमहाप्रसादात् ॥

(ततः प्रविशन्ति कुचेलपत्नी, पुत्राश्च भगवन्तं पूजयितुम् । कुचेलः ध्यानाद्विरमति । ते यथाविधि पूजां कृत्वा गायन्ति ।)

(मङ्गलगानम्-मणिरंगुरागेण रूपकतालेन)

देवकीसुत देवदेव महावतार ते मङ्गलम् ।
देवमुनिनरभूतजातकृपाकर जय मङ्गलम् ॥

गोपिकाजनतारकावृतपूर्णचन्द्र ते मङ्गलम् ।
गोपते मुरलीस्वनावृतमत्तगोकुल मङ्गलम् ॥

कालियादिकदृप्तशिक्षक साधुरक्षक मङ्गलम् ।
कंसमधुदनुहिंसक नरसिंहविग्रह मङ्गलम् ॥

पद्मजादिमनस्विनीजनसेवितेश्वर मङ्गलम् ।
भक्तपालक मुक्तिदायक सत्यरूप ते मङ्गलम् ॥

सदा स्वभक्तेषु भृशं प्रसन्नो
रमासमेतः सकलार्तिहन्ता ।
सर्वामयं लोकगतं व्यपोह्य
हरिः स नो मङ्गलमातनोतु ॥

गोविन्दकरुणानृत्तरङ्गेऽम्बाटिगृहे मया ।
जातया देवकीनाम्न्या लघुकाव्यमिदं कृतम् ॥

सङ्गीतनृत्तसहितं बालकाभिनयोचितम् ।
श्रितया कृष्णपादाब्जं दृश्यं भक्तिसमन्वितम् ॥

(समर्पणम्)

येषां गुरूणां स्मरणेन नित्यं
मनः प्रसादं स्वयमभ्युपैति ।
आचार्यवर्यान् मनसा भजे तान्
विद्यासु वाचस्पतितुल्यकीर्तीन् ॥

यैः प्रदत्ता स्वशिष्येभ्यो
विद्या कल्पलतायते ।
तेभ्यः श्रीगुरुवर्येभ्यः
कृतिरेषा समर्प्यते ॥

काञ्चुकीयः—

सर्वत्राङ्गं पलितधवलं राजतद्योतमीक्षे
जीर्णं बद्धं वलिवलयकैः रज्जुभिर्दार्ढ्यहेतोः ।
एतत्कार्श्यं परिणतिकृतं लाघवं मन्यमानः
भोक्तुं योग्यं श्लथमपि वपुस्तर्कये तृष्महिम्ना ॥ ६ ॥

हन्त! अस्यापि महेन्द्रस्य एतादृशतृष्णामेव विपत्तेः कारणं पश्यामि । शापावासहस्रनयनानि सन्ध्यामुखपाटलानि अन्तः-क्काथतुन्नानि उच्छूनप्रान्तानि उन्मीलनासहानि अद्य बिभर्ति । अथ को वायं पांसुप्रचारः, येनायमन्धीकृत इति अद्यापि न ज्ञायते । असुरोपरोध-भीतिगृहीतमेरुगुहावासैरुज्झ्यमान इव सुरैः अद्य निष्प्रभोऽयं स्वर्गलोकः । पांसूत्पातसमये नष्टा देवस्य महिषी क्व वर्तत इति ज्ञातुं प्रेषिताः चरा अद्यापि न प्रत्यागताः । तदेष प्रियावियोगः प्रभोर्व्यसनमुद्वेलयति ।

(ससंभ्रमं प्रविश्य चरः)

चरः—निवेद्यतां निवेद्यतां नाकलोकनाथाय वार्ताहर उपायात इति ।

काञ्चु०—बाढम्, तथा । (इति महेन्द्रमुपसृत्य) स्वामिन्! चरः क्वश्चिदुपायातः ।

बृहस्पतिः—तदविलम्बं प्रवेशयैनम् ।

काञ्चु०—आर्य! तथा । (इति गत्वा चरं प्रवेश्य) अयं स्वामी, उपसर्पतु भवान् ।

चरः—जयतु महेन्द्रः ।

बृह०—जिष्णो! पौलोमी-(इत्यर्धोक्ते)

इन्द्रः—आः! प्रिये, आलिङ्ग माम् । हन्त! कथं न पश्यामि ताम् ।

बृह०—शचीपते! पौलोमीवार्ताहरः प्राप्त इति मया वक्तुमुपक्रान्तम् ।

आर्य, पश्य पश्य, पुरतः स्फुरत्सहस्रकरप्रभासन्ताडितविमल-कलधौतसरुसमुत्थितरोचिर्भिः सृजन्निव कोटिशः प्रतिद्युतिनिधीन्, समुज्जृम्भमाणभेरीपटहदुन्दुभ्यादिवाद्यघोषश्रवणसमनन्तरमेव स्वहस्ताद् अचिरादपगमिष्यन्तीं भूमिं असह्यतयेव नखाग्रैः विलिखन्तः कुर्वन्नखिलानपि क्षोणीपतीन्, चरन्निव कुलपर्वतसङ्घः, क्षुभित इव कल्पपारावारः, रथगजतुरगपदातभारेण 'क्लेशानुभवं विना न साध्यं वीररुद्रप्रणयसर्वस्वम्' इतीव पीडयन् मेदिनीं, प्रचलति जिष्णुरितो नगरात् वीररुद्रसेनासङ्घातः ॥

द्वितीयः—(निरूप्य) आर्य! क्रान्तं नगरद्वारं सैन्येन। तनूभवति सर्वं नयनस्य। केवलं घोष एव तुमुल आकर्ण्यते। अपि च पश्य, लसत्यप्यनन्यसाधारणतेजोराशौ रुद्रनृपतौ सावष्टम्भमुच्चैः स्थितवन्तं भास्करं स्थगितवत्यो धूलयः सर्वलोकसमक्षं तच्छ्रियं विलुप्य मालिन्यं च तं प्रापयन्ति।

प्रथमः—आर्य! किमुच्यते अस्मत्प्रभोर्जयशीलतां प्रति। पश्योपरि

गन्धानेकपनाथयूथविगलद्दानाम्बुसेकार्द्रिताः
धावत्प्रोद्धतघोटिकाखुरपुटोत्खातोर्व्युदग्रोत्थिताः।
एताश्छादितकेतुपट्टपटला रुद्धारुणा धूलयः
सामन्तं द्युपतिं विधातुमुदयन्त्यूर्ध्वं नृपाग्रेसराः ॥ १० ॥

द्वितीयः—हन्त! भूमिरेव दिवमारोहतीव। सम्यक्छादितसूर्यतया द्राङ्निष्पन्नप्रदोषमिव भुवनमाभाति। पश्य पश्य, परितोऽपि नासीरपांसुजृम्भणापादितप्रदोषस्य लोकस्य तांस्तान् नियमविकारान् ॥ तथा हि—

श्यामाप्राप्तिमपेक्ष्य सम्भ्रमकृतालङ्काररागांशुकाः
जालेष्वाननपङ्कजानि दयितप्राप्त्युत्सुकास्तन्वते।
ता वेश्या वरवर्णिनीश्च नगरीरथ्याचराः कामुकाः
वीक्ष्य श्वासमुचस्स्वकीयगृहमुद्दिश्य त्वरन्तेऽधुना ॥ ११ ॥

काञ्चुकीयः—

सर्वत्राङ्गं पलितधवलं राजतद्योतमीक्षे
जीर्णं बद्धं वलिवलयकैः रज्जुभिर्दार्ढ्यहेतोः ।
एतत्कार्श्यं परिणतिकृतं लाघवं मन्यमानः
भोक्तुं योग्यं श्लथमपि वपुस्तर्कये तृष्णहिम्ना ॥ ६ ॥

हन्त! अस्यापि महेन्द्रस्य एतादृशतृष्णामेव विपत्तेः कारणं पश्यामि । शापावाप्तसहस्रनयनानि सन्ध्यामुखपाटलानि अन्तः-क्वाथतुन्नानि उच्छूनप्रान्तानि उन्मीलनासहानि अद्य बिभर्ति । अथ को वायं पांसुप्रचारः, येनायमन्धीकृत इति अद्यापि न ज्ञायते । असुरोपरोध-भीतिगृहीतमेरुगुहावासैरुज्झ्यमान इव सुरैः अद्य निष्प्रभोऽयं स्वर्गलोकः । पांसूत्पातसमये नष्टा देवस्य महिषी क्व वर्तत इति ज्ञातुं प्रेषिताः चरा अद्यापि न प्रत्यागताः । तदेष प्रियावियोगः प्रभोर्व्यसनमुद्वेलयति ।

(ससंभ्रमं प्रविश्य चरः)

चरः—निवेद्यतां निवेद्यतां नाकलोकनाथाय वार्ताहर उपायात इति ।

काञ्चु०—बाढम्, तथा । (इति महेन्द्रमुपसृत्य) स्वामिन्! चरः कश्चिदुपायातः ।

बृहस्पतिः—तदविलम्बं प्रवेशयैनम् ।

काञ्चु०—आर्य! तथा । (इति गत्वा चरं प्रवेश्य) अयं स्वामी, उपसर्पतु भवान् ।

चरः—जयतु महेन्द्रः ।

बृह०—जिष्णो! पौलोमी-(इत्यर्धोक्ते)

इन्द्रः—आः! प्रिये, आलिङ्ग माम् । हन्त! कथं न पश्यामि ताम् ।

बृह०—शचीपते! पौलोमीवार्ताहरः प्राप्त इति मया वक्तुमुपक्रान्तम् ।

इन्द्रः—का वार्ता, कथ्यताम् ।

चरः—तत्तत्कार्यं परित्यज्य स्वजनं च विस्मृत्य केवलं देवव्याधिचिकित्सापर्याकुले सत्यस्मिन्स्वर्गलोके, देवावरोधे च देवपादसपर्यार्थम् इतस्ततोऽत्रैव त्वरमाणे, पांसूत्पातदिने नन्दनवने पांसुपूरणदृढीकृतकर्दमे कस्मिंश्चित् क्रीडासरसि पतितायाः उत्थातुमक्षमाया राज्ञ्याः न कोऽप्यचिन्तयत् । अद्य परिजृम्भिते अन्धतमसे अञ्जनेन रोदसि परिलिप्ते, कदर्थितप्रभे मरीचिमालिन्यपि विषादापनयनाय कुहचित् कोणे विलीने, छिद्रान्वेषिभिरसुरैः संघीभूय सह रक्षोभिः अमरावतीस्थगनाय बहिरायातम् । मार्गे च नन्दनवने, वनदेवतयापि त्यक्ते, तैरालोकि सा विषमदशापन्ना अमरावतीमहिषी । ततस्तैः, 'भवतु इमामपवाह्य देवेन्द्रविजये पणं कुर्मः' इति पर्यालोच्य आक्षिप्यत पौलोमी ॥

(सर्वे विस्मयस्तब्धास्तिष्ठन्ति ।)

इन्द्रः—आः! कथम्? अपवाहिता प्रिया दैत्यैः । हा हतोऽस्मि मन्दभागः ॥

बृह०—महेन्द्र! मा मा अधिकं सन्तप्य । मा मा भवानश्रुभिः व्यथाम् अधिकीकृत्य ॥

इन्द्रः—स्वामिन् सुरगुरो, पौलोमीप्रत्याहरणाय प्रयोगः क्रियताम् । दयितामुखचन्द्रालोकनेन, मन्ये, सुधाभिरालिप्तं नयनम् अपोपद्रवं भवेदिति ॥

चरः—गुरो! प्रयोग इति मनसा चिन्तयितुमपि नावकाशोऽद्य । बहिर्लोकः परितः प्रसरता तमसा व्याप्यते । अचिरेण स्वर्गलोकोऽपि पातालं भविष्यति । अपि च वान्त्यूष्मला वायवः । एतादृशे काले, को वा बहिर्जिगमिषति, गन्तुं वा ईष्टे ॥

बृह०—अथ कुत इदम् आकालिकं तमः, किंकृता अमी अनलसमीराः?

प्रथमः—(अन्यतो दृष्ट्वा) आर्य, इतो वामतो नयनं देहि । न केवलं वयःकुलानि नीडाभिमुखीभवन्ति, जरद्गृहवृक्षतः प्रसृताः कर्णारुन्तुदनादं कुर्वाणाः कौशिकाः तमश्शकला इव इतस्ततो डयन्ते । अजिनपत्राश्च सहस्रसंख्यया परितोऽपि प्रचरितुमारभन्ते ।

द्वितीयः—किं भणति भवान्? कुतोऽत्र एते अपशकुनाः शकुनयः? ते खलु अधुना समेत्य संभावयन्ति स्थिरवासेन वीररुद्रवैरिविमानान्तः-प्रदेशान् ।

लोकालोकमहीधरार्धमभवत् ध्वान्ताभिभूतं चिरात्
तस्मिन्नुन्मिषदन्ध्रभूपतिमहातेजोभिरुद्दीपिते ।
विस्रब्धावसथप्रचालितगिरित्वक्पत्रसङ्घा द्रुताः
सोल्लुका मथितारियूथभवनान्याप्लावयन्ति द्रुतम् ॥ १२ ॥

पश्य, पश्य (इत्यन्यतः दृष्टिमावर्जयन्) मार्जारांश्चेतः कपटाकुञ्चितपादान् मन्दमन्दं क्रममाणान् । बहिस्सरति च महती मूषिकपरम्परा । आर्य! पश्य—

किमिति कथयाम्याखुस्त्रीणां गृहेऽन्ध्रपतेः श्रियं
विपुलविवराभ्यन्तर्गोणीशताहिततण्डुलान् ।
गुडघृतघटान् मार्जारेशास्समीक्ष्य पलायिताः
अनुमितिरसास्स्वान्रक्षन्तस्स्तुवन्ति च पायसम् ॥ १३ ॥

[नेपथ्ये उदेति घण्टारवः ।]

प्रथमः—(श्रवणमभिनीय) अपि शृणोत्यार्यो घण्टारवं, बुभुक्षापीडितो देवपूजकोऽसौ शीघ्रायातप्रदोषमभिनन्दमानः निवेदनान्नलोलुपतया शिवायतने पूजां त्वरया निर्वर्तयति ।

द्वितीयः—(उपहसन्) वीक्षतामार्य एतानाकुलान् इह श्रोत्रियान् ।

अलिन्देष्वद्यैव श्रमपरिजिहीर्षात्तशयनाः
वहन्तस्संभुक्तं जठरपिठरे नो परिणतम् ।
मृशन्तस्तुन्दाग्रान् अनभिलषितोद्घाटितदृशोऽ-
परां सन्ध्यामुद्यन्त्यलसमलसं सेवितुममी ॥ १४ ॥

अपि च अद्याहमेवं मन्ये भवति भाषणं दिवि मिथः शचीदेवराजयोः—

किं ते पौलोमि दुःखं? प्रिय किमिति परं म्लायते कल्पवृक्षैः;
मा भूदस्माद्विषादः कुवलयसरसीमेहि संभावयावः ।
किं वा तत्राहि? मुग्धे विकसितसुषमैवाद्य सा चित्रमेतत्
चित्रं किं त्यागिवीरक्षितिपतियशसा प्लाव्यते सर्वलोकः ॥ १५ ॥

प्रथमः—(आकाशे लक्ष्यं बद्ध्वा) आर्य! आस्तामयमिह लौकिको विकारः । उपर्यालोकय—

नृत्ताय सन्नह्यति चन्द्रमौलिः हसत्यमुं वीक्ष्य नगेन्द्रकन्या ।
सायंविधेः प्राप्य महर्षयोऽपि मुह्यन्ति दृष्ट्वा द्युनदीं मृदक्ताम् ॥ १६ ॥

तदस्तु, यथा तथा वा उपरि स्वर्लोकवृत्तान्तः । एहि नगरीमेव सर्वां विपर्यस्तविधिविचित्राचारां विलोकयन्तौ आत्मानं विनोदयावः ॥

(निष्क्रान्तौ ।)

[इति शुद्धविष्कम्भकः]

[ततः प्रविशति नन्दनवनं महेन्द्रः पुलोमजया सार्धम्]

इन्द्रः—(शचीमाहूय)

कान्ते फुल्लमुखांबुजे कुसुमितां, नीलेक्षणे सालिकाम् ,
आलोलायतकुन्तलेऽनिलसमाधूतप्रतानव्रजाम् ।
वक्षोभारनते फलावनमिताम्, आलिंग्य मामेह्यमुं
चूताश्लेषवतीं व्रजेव लतिकां शोभां तवाबिभ्रतीम् ॥ १७ ॥

[चूततले शिलापट्टके उभावप्युपविशतः]

(पतिकृतकण्ठग्रहा शची)

शची—नाथ! किमेतदद्य माध्याह्निकतापापनोदनाय धारागृहं गतवत्याः मे रभसा अज्ञातं कालोऽपयातः, भवदीयकरवल्लीसमाश्लेषदायी प्रियः प्रदोषश्च आपतितः शीघ्रमेवेति निर्भरानन्दा चित्रायितास्मि ।

इन्द्रः—प्रिये! ममाप्यस्मिन् विषये कश्चिदासीदेव वितर्कः । आकालिकसूर्यास्तमयमाकलयतः चिन्ता मे क्षणमाविरभूत् । तथापि किं चिन्तया, वर्तते सन्ध्यासमयः मदनाधिकारमनोहारीति त्वामेव, वरारोहे, स्मारितस्सन् नन्दनमागमम् ।

शची—आस्तामास्तां प्रियंवदक! किमद्य सत्यं सन्ध्या वर्तते? (समन्ततः उभौ निपुणं वीक्षेते) (शिलापट्टकादुत्थाय)

इन्द्रः—सत्यमाह भवती । इतः पश्य पांसूत्करजम्बालितविटपान् अनुत्फुल्लकुसुमान् वीक्ष्य वृक्षान् अनासादितहेतिसम्भारः विषीदन्निव याति कुसुमायुधः ।

(शची नेत्रे कराभ्यां पीडयति । अश्रूणि च पटाञ्चलेन उन्मार्जयति ।)

इन्द्रः—(शचीं विलोक्य) हा प्रिये! किमापतितं ते नयनयोः! (इति विह्वलां तां गृह्णाति ।)

शची—हन्त! नाथ! हा प्रिय नाथ अक्ष्णोर्मे पांसूपरोधः ।

इन्द्रः—(स्वोत्तरीयेण बाष्पक्लिन्नं प्रियामुखं परिशोध्य स्वमुखानिलं च तन्नेत्रयोरर्पयन् किंचिदिव स्मितेन) अहो! दशावैषम्येऽपि लक्ष्मीपोषः—

उद्गलितनयनवारिप्लावितगण्डं शशिशिलामनोरम्यम् ।
अयमपि चपलचकोरः तृष्णालोलं बिभर्ति वदनाग्रम् ॥ १८ ॥

(इत्युन्मुखीभवति चुम्बनाय; महान् वाति वायुराकर्षन् रेणुपुञ्जम्, सहसा स्वयमपि महेन्द्रः उत्प्लवन् इतस्ततो धावति ।)

इन्द्रः—(परावृत्य) प्रिये! प्रिये! अहमपि पांसुभिः पीड्ये । हा! कथं मम नयनानि दूयन्ते । आः कष्टम्! (इति क्रन्दन् इतस्ततो धावति ।)

शची—हा प्राणनाथ! क्वासि, न पश्यामि भवन्तम् ।

इन्द्रः—इन्द्राणि! इतोऽस्मि मन्दभाग्यः । एतावत्कालं एकपद एव सर्वास्वपि दिक्षु लसन्तीः स्वर्वारवामेक्षणा अनुभूय सहस्रलोचनदानाय महर्षिं प्रतिपदं वन्दमानोऽभवम् । हा धिक्! कुटिलाशयान् मुनीन्! अद्य पश्यामि गौतमस्य दृष्टिकौटिल्यम् । अन्तःप्रविष्टरेणूनि अक्षीणि मे घुरुघुरायन्ते, हन्त घुरुघुरायन्ते । (इति भ्रान्तो धावति अभितः ।)

शची—हा कष्टम्! अब्रह्मण्यम्! न शक्नोमि चक्षुषी उन्मीलयितुम् । पातालमिव बहिर्वर्तते । हा प्राणनाथ! किमापतितं ते? कुत्रासि? (इति क्रन्दन्ती कुत्रचिद्धावति ।)

इन्द्रः—अरेरे उद्यानपालिकाः! शीघ्रं गच्छत । द्वाराधिकृतान्निवेद्य अश्विनीकुमारावानयत । हा हा न सहे न सहे । (इति हस्ताभ्यां नयनानि निष्पीडयन्नधिकीकरोति वेदनाम् ।) हा मत्पातकस्य फलमद्यैवानुभवामि । धिक् धिक् सहस्रलोचनतां मे । ओषधीपते! अमृतकिरण! क्वासि! प्रिये प्रिये! कुत्रासि? तुहिनज्योतिषमानय । (इति प्रधावन्नपक्रान्तः ।)

(शची च धावनवशात् तान्ता नष्टदृष्टितया भ्रमणे क्वचित्क्रीडासरसि पतति ।)

शची—(हन्तेति अक्षिणी उन्मृज्य जलेन) हन्त! किमेष अपूर्व उत्पातः चक्षुषां, यद्भुवनैकचक्षुरपि नालोक्यते । (इत्यर्धोक्ते परावृत्य पश्यति सरसि परिपतति धूलिजालम्) हा, कथं क्षणात् सरोऽपि चुलुकिताम्भः कर्दमप्रायं जातम् । अब्रह्मण्यम् अब्रह्मण्यम्! दृढीभवति पङ्कोत्करः । कथमुत्तिष्ठेयम् । प्राणनाथ! उद्यानपालकाः, नाकलोकवासिनः! हा

त्रिभुवनैकगुरो शङ्कर! (इति आवलग्नं भूम्यन्तःस्थिता हस्तौ विक्षिप्य क्रन्दन्ती मुह्यति ।)

॥ इति नासीरपांसुघाटी नाम प्रथमोऽङ्कः ॥

॥ अथ द्वितीयोऽङ्कः ॥

(कस्यचिदरिभूपतेर्नगरप्रान्ते अरण्यम् । तत्र च शरणं गतं राजकुलं वीररुद्रेण अपराष्ट्रीकृतम् ; प्रविशति वनदेवता ।)

वनदेवता—(पर्याकुलाक्षी परितो वेपमाना) कुतो हुम्भाभिः ताम्यन्ति गावः? मृगकुलं च पर्याकुलं धावति? भिन्नसमाधयो योगिनोऽपि कन्दादीन-लभमानाः जलेन वातेन च वर्त्तयन्ति । किमियमापदापतिता मे वनान्ते? (अन्यतः क्वचित् संभ्रमेण गत्वा सखीमाह्वयति ।)

(प्रविशति सखी)

सखि! किमेतत् अवस्थावैषम्यमिह?

सखी—हला अस्ति भूमौ कश्चिद्राजा ।

वनदे०—कुत एकः, बहवो वर्तन्ते... ।

सखी—बहव इति तत्पुरावृत्तम् ; अद्य एक एव ।

वनदे०—हुम्! किं तस्य?

सखी—मा मा उपहस । केवलं राजेति मात्रं भणामि, यतः

तस्मिन् 'जहात्यतिशयोक्तिरलङ्कृतित्वं
न्यूनोपमात्वमुपयात्युपमापि सर्वा' ।
वस्तुस्थितिप्रकलनं च न साध्यमेव
तस्मिन्नभूतचरतादृशचित्रभूमौ ॥ १ ॥

युवैवैष संप्रति विश्वजित्सत्रसमारम्भणकुतूहली पारमैश्वर्यप्रतिष्ठार्जनेन स्वं नाम रुद्र इति अन्वर्थं कर्तुमुद्यतः ।

वनदे०--(किंचिदिव कुपिता) तत्प्रवर्ततां नाम विश्वजिते, नाकजिते वा, किमनेन नः ?

सखी--तत्कृतैषा दुरवस्था नो वन्याः ?

वनदे०--(विस्मयविशालनेत्रा) कथं कथम् ?

सखी--तेन स्वस्थानतो भ्रंशिता राजानः, पश्य, अत्र वनभागममुं शरणं गताः ।

वनदे०—व्रजन्तु नाम शरणं, तत् कुतो वेयं पीडा वननित्य-वास्तव्यानाम् ।

सखी—मा कुप्य ! मा मा प्रकटय एवमुच्छ्वायम् । उद्रिक्तं स्थावरमपि न सहते स महीपतिः । शृणु, एते नृपा अपपदा ह्यः केचन फलादिभिराहारमकुर्वन् । अन्ये केचन फलादीन्यलभमानाः सर्वमपि तृणं भुक्तवन्तः । अपरे केचित् तलोपरि किंचिदपि नासादयन्तः कन्दादिमृगयया भूमिमखनन् । पश्य ! पश्य ! अधस्तात् वराहकुलघोणोत्खाता इव गर्ताः तत्र तत्र विलोक्यन्ते ॥

अपि नास्त्येवंप्रभावस्य कापि कारा निजराजधान्यां अमून् बन्दिनः प्रक्षेप्तुम् ?

सखी—भगवति !

जिष्णुश्रीवीररुद्रप्रमथितधरणीपालबन्धङ्गनानां
भूरिश्वासोष्णवातैरधिकमभिहतेष्वुत्स्फुटद्वित्तिकेषु ।
कारावासेषु तत्तन्नवनवरचनाव्यग्रिता वेश्मकाराः
तान्ता हन्त स्ववृत्तिं विजहति च दिशो विद्रवन्त्यन्ध्रपुर्याम् ॥ २ ॥

(प्रविशति नन्दनवनदेवता)

नन्दन०—हला ! अपि कुशलं सख्याः ?

वनदे०—हला! ईदृशं मे कुशलम्! पश्य वीररुद्रो नाम राजा कश्चित्, जैत्रयात्राप्रचलितः किल। तत्कारितानर्थाकुलं वनं दृष्ट्वा अत्यन्तं रुग्णहृदयास्मि।

नन्दन०—हला! वृत्तान्तमेनमन्तरा ममाप्यस्त्येव भूयान् हृदय-परितापः। ह्यः मध्याह्ने सहसा पांसुनिकरपरिपाटलिता मे कल्पकादिपादपाः समालम्भिता जम्बालमालिन्यम्।

सखी—कथमद्याप्यमरवनिकायामङ्घ्रिपाः! चिरात् अपगतकल्पकानो-कहा अनेहसमेतावन्तं अतिशोचनीयास्ति कीर्णकान्तारोषरस्थलीवेति खलु श्रूयते।

वनदे०—किम्?

सखी—किमन्यत्?

तादृक्षस्य प्रभवमनिदंपूर्वविश्राणनश्री-
श्लाघस्यान्ध्रेशितुरिह भुवि श्रावितास्स्वर्द्रुमौघाः।
ये तत्सेवारुचिविरचितैकाश्मवासास्तदीया
एधायन्ते विटपनिचयास्तत्पुरीपक्कणेषु॥ ३॥

वनदे०—(नन्दनवनदेवतां प्रति) भवत्वियमतिभाषिणी प्रलपन्ती। हला! कथय कथय त्वं स्वर्लोकवृत्तान्तस्य। ततः—

नन्दन०—सहस्राक्षोऽपि धूलिभिः अतिमात्रं दूयमाननयनः, मत्तो निर्गतः, अश्विनीकुमाराभ्यां शतभिषङ्नाथेन च चिकित्सितः, पर्याकुलैः सर्वैरपि दिविषद्भिरुपास्यमानः, अतिकरुणदशायामद्य वर्तते। अद्यापि न निवृत्ता तत्पीडा। शोकविकलीभूतं सुरलोकं दुःखं वीक्षमाणा असह्यतया तदवस्थायाः, मनोविनोदार्थं त्वामुपागतोऽस्मि।

सखि! सर्वोऽप्ययं काकतीयविभोः तस्य विक्रमप्रक्रियाक्रमः।

वनदे०—हला ! कीदृशोऽयं प्रतापो वीररुद्रस्य ! कियान् विषादो महीपतीनामेतेषाम् ! (इति वदन्त्यामेव तस्यां सहसा मूर्च्छन्ति ज्वलनानिलाः।) सख्यौ ! कथं आनला अनिलाः प्रचरन्ति । (पुनश्च निरूप्य) अकाले तमश्च परिजृम्भते ।

सखी—किमन्यत् ?

प्रतापरुद्रोन्मथितारिभूमिपाः
तदीयविश्लिष्टनितंबिनीजनाः ।
समेऽद्य दुःखार्णवमज्जितास्ततः
तमांस्यमून्यूष्मलवायवोऽप्यमी ॥ ४ ॥

वनदे०—हन्त ! उद्गत्य पातालेन आव्रियत इव जीवलोकः । कथम् आत्रिदशालयमन्धतमसमलीमसमवलोक्यते—

कालाम्भोधरपटलैरिवावृतं खं
रक्षांसि प्रविचरितुं समारभन्ते ।
क्रन्दन्त्यभ्यधिकमपीह कौशिकौघाः
कीदृक्षा विपदियमुत्थिताऽधुना नः ॥ ५ ॥

तदेह्येहि, दृष्टिर्लुप्यते । ओषधिसन्निवेशस्थलीं गच्छामः ॥

सखी—यदि तत्रापि ज्योतिः स्यात् !

[निष्क्रान्ताः सर्वे ।]

(विष्कम्भकः)

(ततः प्रविशति शयानो महेन्द्रः पार्श्वोपविष्टैः अश्विनीकुमार-सुधांश्वादिभिः चिकित्स्यमानः, सपरिवारः ।)

नारदः—मातले!

मा०—केनाहमाहूये?

ना०—देवसूत!

मा०—तामिस्रे न कमपि पश्यामि। अपि स्यात् काचित् नृशंस-दैत्यवञ्चना॥

ना०—(उपसृत्य अंसे मातलिं स्पृशति; मातलिरुत्कम्पते) अलं मातले संभ्रमेण, नारदोऽहमस्मि। अलमलं सन्देहेन॥

मा०—स्वामिन्! कल्याणकन्द! नमति महेन्द्रसारथिरयम्।

ना०—(तदक्षिणी प्रमार्ज्य दृष्टिमुत्पाद्य) वत्स! कल्याणं ते भूयात्। अलं कैलासयात्राश्रमेण। तत एवाहमागतोऽस्मि। कतिचिद्दिनानि तत्रैव मे जगदादिमिथुनमुपवीणयतो वास आसीत्। दृष्टं च मयेदमद्भुतोज्जृम्भणम्। तत्कारणं च भगवता स्पष्टीकृतमष्टमूर्तिना॥

मा०—कथमिव?

ना०—काले वो निवेदयिष्यति स एव भगवान् भवः। अद्य प्रस्तुतं चिन्तयावः। देवेन्द्रविपत्तिं समाधिनाऽऽकलयता पशुपतिना आदिष्टं "नास्त्यन्य उपायः। नारद! गच्छ, मातलिं भूलोकं प्रेष्य महीनाथं वीररुद्रं मद्भक्तमानय। मङ्गले सर्वं परिणमिष्यति" इति॥

मा०—आश्चर्यम्! महीनाथं, वीररुद्रम्! अथ कोऽयं महीनाथो वीररुद्रः?

ना०—मातले! अनभिज्ञोऽसि निर्माणवैचित्र्याणाम्। अस्ति भूमण्डललामभूता न्यक्कृतदिविषत्पुरलक्ष्मीः, नगरी एकशिला नाम अन्ध्रेषु। तत्र विद्योतते संप्रति प्रतिपन्नदिग्विजययात्रः नाम्ना वीररुद्रः काकतीयकुलदुग्धाब्धिकौस्तुभः। यस्य च जन्मदिने—

देवो भूतपतिस्स्वयं गणयुतः पुत्रं कुमारं प्रियं
पार्वत्यश्रुभिरार्द्रितेषु हिमवत्प्रान्तेष्वमृग्यच्चिरम् ।
शून्योराश्च मृशन् रमापतिरगान्म्लानिं, विधातापि च
स्वास्थं वीक्ष्य सरस्वतीविरहितं जाड्यं समालम्बत ॥ ८ ॥

तत् स एवैकोऽद्य त्रिभुवनेऽपि, येन स्यात् देवोद्धारः । तत् त्वरस्व महेन्द्ररथेन ॥

मा०—जैत्रयात्राव्यापृत इति आख्यायि भवता । तत्क्व वा तं प्रेक्षे?

ना०—मातले ! आजलधिकल्लोलकोलाहलभरितवनकुञ्जान्मलयाद् आ च लोकालोकमहीधरमवनीमखिलामेव अवजित्य, गुरुगौरवादुपेक्षितकैलासो हिमवत्प्रान्तविरचितवासभूमिषु वसत्यद्य मानसोन्मादकाप्लवनापहृतप्रचरणखेदयोधः, प्रतिगजशङ्कास्थगितपर्वतेश्वरकटकसेनाकरीन्द्रः, विद्याधरमिथुनोद्गीतनिजनामोत्कर्षश्रवणकण्टकितलज्जितवदनः, गिरिगुहाविश्रान्तः पारीन्द्र इव ।

मा०—स्वामिन् ! विस्तृतास्ता हिमालयभूमयः । अदृष्टचरश्च राजा, शीघ्रं च गन्तव्यम् ॥

ना०—सत्यम, अनेन लक्ष्येण लक्षयेथाः । पर्वतभागो यत्र प्रतापोष्मा यशश्चन्द्रिकेत्युभयसंमेलनेन चित्रसमशीतोष्णो भाव्यते तत्र वर्तते स महाभागः ॥

यत्रैकत्र क्षितिधरतटेष्वा झरिण्यायमानाः
आलोक्यन्ते हिमपृथुभराः अद्रिशृंगावतंसाः ।
तीरोपान्तस्फुरितमहसामोषधीनां मयूखैः
संकर्षन्तो बहलितरुचींस्स्थूलरत्नोपलांश्च ॥ ९ ॥

मा०—अस्त्येव फालेक्षणस्य चन्द्रशेखरस्य समीपे एवंगुणा भूमयः ।

ना०—तदपरं चिह्नं कथयामि ।

× क्वचिद् इति निपातद्वितयमपि विवक्षितं विरुद्धार्थमपि
चित्रत्वं विरुच्यते ।

× क्वचित्फुल्लं पद्मं क्वचिदपि च फुल्लं कुवलयं
स्फुरत्सूर्याश्मानः क्वचिदमृतरुक् चान्द्र उपलः ।
क्वचित्कोकद्वन्द्वं प्रमुदितचकोरीं च निकषा
विरुद्धानामेवं पथि निलय एकस्तव भवेत् ॥ १० ॥

मा०—आम् । अस्ति तस्यैव सूर्येन्दुलोचनस्य भगवतो भवानीपतेः पुरतो विरुद्धानामेवमेको निलयः ॥

ना०—हन्त ! कथमद्यापि अलक्षकं भवति वर्णनम् ! सुरपतिसूत ! एतादृशं पशुपतिपरिसरमपहाय स्थानमपरं यदद्रौ तदेव वीररुद्रस्थानम् ॥

मा०—आः ! गृहीतं लक्षणम् । तत्साधयामि । भगवन् ! भवानपि अमरावतीवास्तव्यानाम् आश्वासनाय प्रवर्तताम् ॥

ना०—बाढम, त्वरस्व । शिवास्सन्तु पन्थानः ॥

[निष्क्रान्तौ]

[विष्कम्भकः]

[ततः प्रविशतः द्वौ देवौ, विशीर्णायां नन्दनवन्यां कुहचन निलीनौ ।]

प्रथमः—सखे, हेतिहतमूर्धतया विकलश्रवणेन्द्रियोऽहम् । तत्कथय, किमद्यापि श्रूयते दितिसुतबलकोलाहलः ?

द्वितीयः—अस्ति अद्यापि कोलाहलः । न जाने कस्यां दशायाम् अमरावती वर्तते इति । किमद्यापि नेदं हतमन्धं तमो विरतम् ?

प्रथमः—वयस्य ! मन्दं भण मन्दं भण ! स्वरानुपातिनो दानवा आवां गृह्णीयुः ॥

(दानवनाम श्रुत्वा अपरः उत्कम्पते । प्रविशति कश्चिदपरः सुरः ॥)

(कर्णे) सखे ! समीपे पदशब्द इव । केनापि दानवेन स्यात् श्वासो निरुद्ध्यताम् । अन्यथा तेन श्वासोपघातो नौ भवेत् ॥

(तृतीयसुरः स्वयम् असुरभिया मन्दमुपसरति ।)

द्वितीयः—हन्त ! उपसृतो राहुः, ग्रस्ता च नौ ग्रीवाकला ।

तृतीयः—हन्त ! स्वर इवात्र कस्यचित् । अपि स्याद् विरोधिनः ?

प्रथमः—भोः सत्यं विरोध्येव, तद्देहि सखे, निभृतं सरन्तौ....

तृतीयः—हा शत्रुः, शत्रुरत्र (इति भिया धावति, तथैव तौ च धावतः, अन्ते त्रयोऽपि सङ्घट्टमाप्नुवन्ति ।)

सर्वे—(प्रत्येकं) हा हतोऽस्मि । असुरः असुरः ! (सर्वे श्रुत्वा) कथं सर्व एव मित्राणि वयम् ॥ (दीर्घं निश्वसन्ति । नवं प्रति)

प्रथमः—सखे ! किं किं वृत्तम् आ असुरोपरोधोपक्रमात, तत्कथय ।

तृतीयः—व्याधित एव महेन्द्रः आक्षिप्य कारागृहे क्षिप्त इति, तत्तद्देववाराङ्गनाः बलात्कृत्य अपनयद्भिः असुरापशदैः महान् आमोदकोलाहलोऽकारि । अपि च सुधर्मायां सजग्धिसपीत्यादिभिः अशिवैः रुतैः शवभूमाविव शिवा आरवान् कुर्वन्त्यस्मद्द्विषः । सुप्रतिष्ठितश्रीकं सहसाऽभाग्यपरिवर्तितलक्ष्मीकमवलोक्य अति हि नाम जृम्भते शोकः असाधारणः । (इति साश्रु किंचिदिव स्मृत्वा सगद्गदं) सा तादृशी देवसभा ! ।

आरत्नाञ्चितभित्तिबिम्बिततनुस्वर्वारवामेक्षणा-
दोरान्दोलितचामरानिलचलच्छैवालरोमावलिः ।
लास्योल्लासजघर्मतोयकणिकामुक्तावलीचित्रितां
देवो यत्र सहस्रदृक् निरविशत् रम्भोरुरम्भाश्रियम् ॥ ११ ॥

सा संप्रति अनालोकनीयाम् अवस्थां नीता ॥

प्र०; द्वि०—हन्त भोः (इति विषादं नाटयतः)

तृतीयः—हन्त! यत्र—

सुमामोदमेदस्विवायौ निकुञ्जे व्यहारि प्रमत्तैः शिखण्डीन्द्रचक्रैः ।
अहो तत्र संप्रत्यमी क्रोष्टुसंघाः दधत्युच्चकोलाहलं विद्धकर्णम् ॥ १२ ॥

(इति वदति तस्मिन् समुन्मीलति समन्ततः तेजः । सर्वे विलोकयन्ति ।)

प्रथमः—वयस्यौ! अस्मदिष्टं रोचिरुदेति ।

द्वितीयः—किमेतत्? एवमाश्चर्यं बद्धश्रेणि अनुवध्नाति ।

तृतीयः—(निपुणं निरूप्याधस्तात्) ज्योतिरिदमुद्भवति ।

अनायाते स्वर्णक्षितिधरगुहान्तश्शरणतः
महोमूर्तौ तस्मिन् कथमुपहतं संप्रति तमः ।
कुतो लोकालोकाचलतटगताग्नेयदृषदां
स्फुरत्तेजोघाटी झटिति नयनान्यन्धयति नः ॥ १३ ॥

प्रथमः—हन्त! भोः सखे पश्य परितो नन्दनस्य शोचनीयां दशाम् । भग्नाः पारिजातादयः । विशीर्णा लतागृहाः, क्रीडासन्निवेशाः सरस्सोपानपङ्क्तयश्च ॥

तृतीयः—अहो! इदमत्यन्तमसह्यं द्रष्टुं अचिरोपनतपातं सर्वशोभासंपन्नं वस्तु ।

तृतीयः—मित्रे! पश्यतम—

निरस्तं तद्वान्तं किमपि किमपि स्मेरवदनाः
प्रसादं काष्ठान्ताः दधति नयनं शक्तिमयितम् ।
क्रमादुन्मीलन्ति प्रकटरुचि ते ते च विषयाः
वराहोत्क्षिप्ताया जलधिजठरान्तादिव भुवः ॥ १४ ॥

प्रथमः—कुत इयमूर्ध्वज्वलना शिखावलिः भूतलादतिजवेन उदेति ।

तृतीयः—सखे निपुणं निरूप्यताम् । रथमिव दिवमारोहन्तं पश्यामि ।

परं च—

अशनिध्वज उच्चकैर्यतो हरिता यच्च तुरङ्गमा अमी ।
ध्रुवमद्य कुतोऽपि भूतलाद् उपकारेण सहैति मातलिः ॥ १५ ॥

प्रथमः—आम्, सत्यम, एवमेव । अपि च जानामि पूर्वमेव सम्यक्; अयं सुधीः अत्युपकारी च काले मातलिर्नाम ॥

[प्रविशति नारदः ।]

नारदः—(तानवलोक्य) अमरतपस्विनः, पश्यत, उपसर्पति युष्माकमुज्जीवकः, आनन्दस्य कन्दलयिता, द्विषन्मर्दनः, उत्सवप्रदाता प्रमोदनाडिन्धमः, क्षितितलालङ्कारः, भुवो भर्ता, लक्ष्म्या वासः, वाण्याः स्वयंवरवरः, प्रतापस्य एकं शरणं, तेजसां निपुञ्जः, वीर्यस्य मूर्तिः, नाम्ना रुद्रः, अपर इव महेश्वरः आयाति । अद्य च—

दिशः प्रसीदन्ति सुखं च वायुः
आवाति सर्वत्र सुगन्ध एषः ।
प्रतापरुद्रश्च समैति ; शत्रुः
क्षतः, पुनर्वः परिनिष्ठिता श्रीः ॥ १६ ॥

(उपर्यागत्य रथः तत्पार्श्वे तिष्ठति, रथादवरुह्य)

मातलिः—स्वामिन्! वीररुद्र! अयं देवर्षिर्नारदः ।

वीररुद्रः—महर्षे! प्रणमत्ययं विधेयो वीररुद्रः ।

ना०—(स्वगतम्) अहो! विनयोत्कर्षः । अहो! शरीरसौन्दर्यम्, आकृतिगाम्भीर्यं, मुखतेजश्च ॥

चित्रमेतादृशी सृष्टिः तातेन कलिता कलौ ।
प्रदातुमिव सर्वेषां गुणानामभयं परम् ॥ १७ ॥

(प्रकाशम्) स्वस्ति तेऽस्तु परन्तप !

वीर०—स्वामिन् ! अनुगृहीतोऽस्मि । जानामि मातलिः, नायं विलम्बस्य काल इति । तद्भवतामाशिषा, कृपया च भगवतो भूतनाथस्य, सद्य एव गत्वा सकलमपि असुरबलम् ....(इत्यर्धोक्ते लङ्घते ।)

ना०—(स्वगतम्) अहो ! अत्युदात्तता वत्सस्य गुणानाम् ! अहो ! अविकत्थनता ! वत्स ! गच्छ, विजयी भव ॥

वीर०—क्व वा स्थितं सुरारिबलम् ?

सुरास्त्रयः—प्रभो ! संप्रति आक्रान्तनिलिम्पनगराः, सुखं विहरन्ति ते दैवसंपदा संपोषिताः, सुधर्मायाम् ।

वीर०—भवतु, एहि मातले । (इति निष्क्रान्तो वीररुद्रः समातलिः ।)

सुरास्त्रयः—अहो अस्य महानुभावता !

नृपः प्रतापरुद्रोऽयं लोकातीतगुणाम्बुधिः ।
सहस्रांशुर्महोधामा स्फुलिङ्गोऽस्य द्युतेरिव ॥ १८ ॥

(पुरतो दृशा वीररुद्रमनुसृत्य, निरूप्य) अहो ! तेजो वर्धते ॥

एकः—पश्य सखे राक्षसान् !

त्वक्पत्रकौशिकचमूभिरमी सहैव
भीतिप्रतोदबहुलीकृतवेगयाताः ।
सर्वत्र मूर्च्छति महीपतितेजसीत्थं
सीदन्त्यटाभिरमितः शरणं न लब्ध्वा ॥ १९ ॥

ना०—आः किमेतत्, उपसृतमात्रे देवास्थाने वीररुद्रात् स्फुरन्ति लोकघस्मराणि तेजांसि । उदितमिव प्रभानिध्यर्बुदैः । उद्गत इव समस्तोऽप्यौर्वः

पावकः । (पुनश्च पुरोऽवलोक्य) आः! आकारिता आगता बहिर्दानवाः । कथम्, आगतमात्रा एव उदग्रप्रतापज्वालाभिरभिमृष्टाः भस्मावशेषा भवन्ति ॥

सर्वे—(विलोक्य) अये! कोऽयं धूमोत्करः!

ना०—आश्चर्यम् आश्चर्यम् । सत्यं रुद्र एवायम् । अथवा रुद्रादप्यधिकप्रभाव एवायम् । यतः—

निटिलाक्ष्णा सुमधनुषं ददाह रुद्रः पुराणि हसितेन ।
अस्मिन्पुनरुपगच्छत्यपि भस्मीभवति दानवव्रातः ॥ २० ॥

(देवान् आलोक्य) आगच्छत, गच्छामो वयं सुधर्माम् । वीररुद्रतेजसि शलभायितम् अरातिभिः । पौलोमीमहेन्द्रमोक्षाय व्रजामः ॥

सर्वे—बाढम् ॥

(निष्क्रान्ताः सर्वे ।)

॥ इति असुरविजयो नाम तृतीयोऽङ्कः ॥

॥ अथ चतुर्थोऽङ्कः ॥

(ततः प्रविशति बृहस्पतिः सह मातलिना)

बृहस्पतिः—मातले! अथ कोऽयं महापुरुषो वीररुद्रो नाम, येन वयमुज्जीविता अद्य ॥

मातलिः—आवेदितोऽस्मि नारदमहर्षिणा । अयमन्ध्रेष्वेकशिला नाम नगरी, तत्रस्थो राजेति । परमेश्वरस्य भक्तः प्रसादपात्रं च, कुमारस्य अवतारः इति च वर्णितं तेनैव ॥

बृह०—भवितव्यम् । एवमेव मम तदैव अस्फुरत् । अन्यथा कुतो वा परमेश्वरात्, तदंशात् कुमाराच्च ऋते ज्योतिरेतादृशम् ॥

मा०—प्रियं नः, प्रियं नः । दिष्ट्या तदुपकृताः पुनरपि संपन्नास्स्मः । किन्तु अयमेको महान् अद्यापि शोकहेतुः ॥

बृह०—क इव । अपि कृत्स्नाः सुरबन्दिनो मोचिताः ?

मा०—मोचितं देवलोकमात्रम् ।

बृह०—तत्कोऽपरो हेतुरावेगस्य ।

मा०—असुरबलान्मोचितोऽपि प्रावृण्मेघत इव सुधामयूखः, प्रतिष्ठापितोऽपि पुनश्च सिंहासने, प्रापितोऽपि प्रियाम् इन्द्राणीं, नयनेषु अद्याप्यनुपरतात् व्याधेः परं पीड्यते देवेन्द्रः । परं च वीररुद्रतेजोऽवलोकनेन कानिचिन्नयनानि अन्धतां गतानि ॥

बृह०—आम्, मातले, महदिदं शोकस्थानम् । कुण्ठितशक्ती अश्विनौ । अपर्याप्तशीतलतया अशक्यप्रभुसेवः सुधांशुरपि व्यर्थं मन्यते स्ववपुः । कुतो वाऽऽसादितव्या अतिचान्द्री सुधा, यया सहस्राक्षस्य उपद्रवोपशमो भवेत् ॥

(इति चिन्तयति, सर्वतः पल्लवति अपूर्वा चन्द्रिका ।)

मा०—गुरो, किमेतत् ! अकाण्डेऽद्य चन्द्रिका ॥

बृह०—अस्मन्मनोरथेनैव भवितव्यम् ॥

[ससंभ्रमं प्रविशति सिद्धः कश्चन]

मा०—सिद्धपुरुष, कुतस्संभ्रमः ? इत एहि ॥

सिद्धः—आः मातलिस्त्वमत्र, एहि शीघ्रम् । त्वरस्व त्वरस्व । वृक्षं वा प्रासादाग्रं वा आरोहावः । (परितो प्रचालयन्नयनम्) कथं विशीर्णं नन्दनं न प्रयच्छति मे शरणम् ॥

बृह०—अये ! किमेतत् । किंकृतोऽयमावेगस्त्वयि ?

सिद्धः—स्वामिन्, नायं विस्रब्धालापस्यावसरः । रक्षतु भवानात्मानम् ॥

मा०—अलमलमावेगेन । तिष्ठ (इति बलादुपगृह्य) वदतु भवान्, किं वृत्तम्?

सिद्धः—(सत्वरम्)

प्रालेयाद्रेः चन्द्रकान्तोपलेभ्यः गङ्गाकोटिस्सर्वतोऽप्युत्थिताऽद्य ।
तत्र प्रान्तस्सर्व एव क्षणेन क्षीराम्भोधौ मज्जितो वा विभाति ॥ २१ ॥

मा०, बृ०—किं किम्?

सिद्धः—सकलोऽपि पर्वतेश्वरः प्लवति । ततो भीतो विद्रुतोऽहम् । प्लाव्यते चित्ररथवनान्तश्च । अचिरेण ब्रह्माण्डमेव उद्वेल्लत्यस्मिन् प्रलयपयोधौ मज्जेत् । तद्रक्षतमात्मानौ । (इति वदत्येव परितोऽप्येकान्तं धवलं भवति रोदः, अतिमात्रं विद्योतते विशदिमा ॥)

मा०—आचार्य! आचार्य! उपेक्षितं नाम आवाभ्यामेतावत्कालम् सत्यमेव प्रलयपयोधेराक्रमः प्रवर्तते ॥

(विद्रुता अन्ये बहवः पर्याकुला आगच्छन्ति ।)

एकः—स्वामिन् प्रालेयशैलः प्रचलति

द्वितीयः— भगवन्नेष दुग्धाम्बुधामा
व्याप्तुं लोकान्समस्तान् बहुलितसलिलः प्लावयत्येवमद्य ।

बृह०—कैलासो नैव नो वा शिव इह न च वोल्लोलकोलाहलोऽतः?

मा०—हन्तासौ दाक्षिणात्यः क्व नु स मुनिवृषो वार्धिपो मृग्यतां भोः ॥ २२ ॥

(प्रविशति तत्पथेन गच्छन् परमेश्वरः सपत्नीकः, नारदश्च ।)

(नारदः बृहस्पतिसमीपमुपेत्य)

नारदः—भोः सुपर्वाचार्य! अयमत्र देवो वृषभध्वजो याति ।

बृहस्पतिः—स्वामिन्! वृषभध्वज इति अधिक एव श्वेतभ्रमः ।

ना०—अयमत्र भगवान् नीललोहितः शितिकण्ठः, समं सिन्दूरारुणया च पराशक्त्या ॥

बृ०, मा०—आः पश्यामि :

पुरातनस्य द्वन्द्वस्य पुरतो नतयो मम ।

सृष्टिस्थित्युपसंहारलीलाविभ्रमदर्शिनः ॥ २३ ॥

ना०—तदेहि, सुधर्मां याति वो मङ्गलाय सर्वमङ्गलापतिः । वयमपि साधयामः ॥

सर्वे—बाढम् ॥

(निष्क्रान्ताः सर्वे ।)

[इति विष्कम्भकः]

(सुधर्मा । प्रविशति महेन्द्रः वीररुद्रांसविन्यस्तहस्तः सपरिवारः ।)

देवेन्द्रः—संप्रति जाग्रति परितोऽप्यदृष्टचरपीयूषप्रसरे अपनीतनयनव्यथः स्वास्थ्यं प्रापितोऽस्मि । कुतः पांसवः, कुतः तमः, कुतो ज्योतिः, कुतो वेयं अपूर्वा कौमुदी इति विचारे परं कृपणा वयम् ॥

वीररुद्रः—(श्रुत्वा) महेन्द्र ! किमिति किमिति ?

दे०—सखे ! कतिचन दिनानि देवलोकः आश्चर्यपरम्परया विपर्यासित आसीत् । अयं प्रसूनो विशदिमा च तस्यामेकः । न जाने कियदायामवती सेति । तद्भवतु, एहि महीनाथ, लज्जितास्स्मो वयमद्य त्वदीयविक्रमेण । किमुच्यते, त्वां धारयामो जीवितानि ॥

वीर०—विरम, विरम, सखे । अलमतिमात्रं मित्रं स्तुत्वा । अथवा, आत्मश्लाघायां किमिति ते रुचिः ?

दे०—सत्यमाह भवान् । अनपर एव त्वमस्मत्तः । किं बहुना न सहे विकत्थनाम् ॥

(प्रविशति विधिहरिदेवर्षिसंघसमावृतः परमेश्वरः । उभौ प्रणमतः ॥)

परमेश्वरः---(सुधर्मामनुगृह्य अभयहस्तेन) भो भो देवाः, महर्षयश्च ! आसनं तत्तदलंकुर्वन्तु भवन्तः । महेन्द्र, अलंक्रियतां सिंहासनं वीररुद्रेण साकम् ॥

[सर्वे तथा कुर्वन्ति ।]

परमेश्वरः--

यन्नासीरजधूलिपुञ्ज इति वः प्रादादतीव व्यथां
यद्भूस्तारिमहीपतिव्यसनजं तादृक् तमश्चाभवत् ।
यत्तेजोऽसुरघस्मरं यदुदयत्कीर्त्याद्य सर्वं जगत्
दुग्धाब्धीयति सोऽयमेकदृषदो नाथो मदाख्याधरः ॥ २४ ॥

(तदा काचिदशरीरिणी वाणी वैतालिकत्वमाचरति ।)

दुकूलन्त्याशा आभरणति च तारावलिरियं
नभोगङ्गा माला व्यजनममृतांशुर्वियदपि ।
वितानं चास्थानं त्रिभुवनमहो दिग्वसनवत्
यशोराजान्ध्रेशो, मिलितमथवा कोटियुगलम् ॥ २५ ॥

(सर्वे विस्मयानन्दोत्फुल्ललोचनवक्त्राः । इन्द्रः किंचित् लज्जया श्वेतते; वीररुद्रः लज्जावनतमुखारविन्दो भवति ॥)

वीररुद्रप्रापितलक्ष्मीक ! महेन्द्र !

स्वस्था भवन्त्वसुरभीतिविनाशतोऽमी
देवाः, निलिम्पमुनयो हतकर्मविघ्नाः ।
अद्य त्वदीयपदमेष च वीररुद्रः
भुङ्क्ते त्वया सह, न यज्ञशतश्रमेण ॥ २६ ॥

(प्रसरति अरुणिमा सर्वतः । सर्वे संभ्रमन्ति ॥)

केचित्--अहो ! अपशकुनभूता रुधिरधाराः प्रवहन्ति ।

मुनयः--(उत्थाय) नहि नहि, सर्वमङ्गला, अहो, सन्ध्यादेवी!

(इति साञ्जलिबन्धं गायत्रीम् उच्चारयन्ति ॥)

परमेश्वरः--(प्रहस्य) भो देवाः, मुनयश्च, अलमन्यथाविकल्पैः। न किंचिदेतत्। गण्डूषपादाघातादिभिः पुनरपि नन्दनं उज्जीवयितुमादिष्टाः, नन्दनवनगताः अप्सरोविलासिन्यः अस्मद्भक्तस्य वीररुद्रस्य पराक्रमयशोवशीकृतस्वान्ताः तं प्रति प्रकटयन्त्यनुरागम्। तदेष रक्तिमा। तदासतां भवन्तो विस्रब्धम्। अद्य वीररुद्रस्य परमेश्वरप्रतिष्ठाभिषेकं करिष्यामि। पठ्यन्तां प्रशस्तयः ॥

(इति स्वशिरोवासपूतत्रिमार्गगाजलानि वीररुद्रस्योपरि आवर्जयति, स्वनन्ति भव्यवाद्यानि, पतन्ति पुष्पवृष्टयः, नृत्यन्ति अनुभावपेशलममराङ्गनाः। सर्वे हर्षोत्कर्षपुलकिता वर्तन्ते ॥)

परमेश्वरः--पठ्यन्तां प्रशस्तयः।

(बृहस्पतिः प्रशस्तिवाचनाय संरभते; हिक्कति, शोधयति कण्ठं, भ्रान्ताक्षि स्तब्धीभवति, न तु वक्तुं शक्नोति।)

परमेश्वरः--अहो! तपस्वी सुरगुरुरेडमूकतां गतः। ब्रह्मन्नाप्तवाक्यप्रणेतः, भारतीरमण! किमिदं जोषं भूयते ॥

ब्रह्मा--न न, नहि किंचित्। करोम्येव सन्दर्भम्। किन्तु महान् कालोऽद्य यतो गृहिणीविधुरोऽहं कुटुम्बकलहापदेशात् ब्रह्मचर्यमातिष्ठे ॥

परमेश्वरः--सत्यमाह भवान्। मयैव विस्मृतं, यदद्य विसृष्टपद्मलोका विहरति विजृम्भितविलासविलोला कुत्रचिदन्यत्रैव भगवती भारती ॥

विष्णुः--अतिलघु सञ्चराम्यद्य, यदद्य वत्सो वहति भूपालनधुरां, नास्ति च मे मुहुरवतारकार्यभारः। अपि च मामुज्झित्वा कुत्रापि गतां लक्ष्मीमन्तरा विषाद आसीत्। अद्य नवाश्रयं वीररुद्रं विलोक्य पूर्वास्पदं निकृष्टतरमेवेति यत्सत्यं लज्जापितोऽस्मि ॥

मुनयः—भो वीररुद्र! परमेश्वरप्रसादप्रथमपात्रस्य भवतः किमस्त्याशास्यम् । तदेवमस्तु, वत्स! चिराय स्थिरभक्तिर्भव भूतपतौ ॥

दिक्पालाः—स्वतस्सिद्धलोकाधिकधाम्नस्ते किमस्मत्तो दिक्पालकवराकेभ्यो वरणीयम् । तदस्तु, त्वत्सामन्ता इव सम्यक् उन्निद्राः पालयामो दिङ्मुखानि ॥

परमेश्वरः—भवतु, कालोचितं तमेवामन्त्रयामि ।

(भगवन्निध्यानमुहूर्त एवाविर्भवन् ग्रासाग्रे प्रस्फुरत्प्रोथ इवाश्वः संरभते कवीश्वरो विद्यानाथः ।)

अये, प्राप्त एव स्ववैखरीखर्वीकृतगर्वसुपर्वगुरुः, निजसारस्वतविलासश्वेतमानचतुराननः, विवर्तो वाचो वैभवानां, मूर्तः लोकातिगच्छदुत्प्रेक्षापरम्परः, कविरन्वर्थाख्याप्रख्यो विद्यानाथः । भो देवाः, वन्दन्तां भवन्त एनम् । यस्य भगवति वीररुद्रे, वीररुद्रस्यैव यावती मदङ्घ्रियुगे, तावत्या अपि भूयसी भक्तिः । न किञ्चिदपि अन्धेश्वरं स्तोतुं प्रवृत्तम् श्राम्यति तद्वदनम् । अनवधानावसरेऽपि नास्यास्यान्निष्पतति पद्यमेकमपि यन्न वीररुद्रपरमेश्वरभव्यदिव्यनामाङ्कितम् । किं बहुना, यत्सत्यं जपत्येवायं तारकमन्त्रं प्रतापरुद्रं नाम पञ्चाक्षरीमयम् ॥ मयटा नार्थः। पञ्चाक्षरीमिव पद्यस्रग्

(इति वादिन्येव परमेश्वरे एतावदधोमुखो वीररुद्रः गृहीतसर्वाशीः पादयोः परमेश्वरस्य प्रणम्य उत्थाय)

विद्यानाथः—(कण्ठहेषापूर्वकं झञ्झामारुत इव मूर्च्छन् पठति)—

ससेवाहेवाकप्रतिभटमहीपालनिकर-
स्फुरत्कोटीराढ्यप्रसृमरमहोरत्नविवहैः ।
ज्वलद्भानुव्यूहैः स्नपितमरिराजन्यकमनो-
नभोभूजत्पादूद्वयमुदयहेतोर्भवतु नः[1] ॥ २७ ॥

---

1. विद्यानाथविडम्बनार्थाः अन्येऽपि श्लोकाः नाटककर्त्रा कृताः, येष्वन्यतमोऽयं श्लोकः ।

परमेश्वरः--अहो! अयं कविरास्थानिको महाधाटिस्साहसी विद्यानाथः।

एतावदन्ध्रनृपतेः पटहं प्रताड्य
प्रध्माय शङ्खमपि नैव वितृप्यदास्यः।
आबद्ध्य कच्छमवशोध्य गलं प्रताप-
पादूसहस्त्ररचनाय विजृम्भतेऽद्य ॥ २८ ॥

वत्स! अलमतिश्रमेण। (देवादीनालोक्य) सर्व एव वयं मिलित्वा सद्य एव भूमण्डलं गत्वा वत्सस्य साम्राज्याभिषेचनमेकशिलायां निर्वर्त्तितं प्रेक्ष्य आत्मन आनन्दयामः। तदायान्तु सर्वे भवन्तः॥

(सर्वे तथेति उत्तिष्ठन्ति)

वत्स! किं ते भूयः प्रियमुपहरामि। तथापि इदमस्तु भरतवाक्यम्--

त्वत्तुल्येश्वरलाभमोदितमही संपद्भिरेवं सदा
देवानामुपकारलेशमपि वा नापेक्षमाणास्त्वसौ।
त्वं च प्रीणय नित्यमाश्रितमहीदेवान् सुरानोकह-
श्रीलुण्टाकयशश्चणैः प्रमथितारातिः स्वविश्राणनैः ॥ २९ ॥

[निष्क्रान्ताः सर्वे]

॥ इति परमेश्वरपट्टाभिषेकाख्यः चतुर्थोऽङ्कः ॥

(निर्मातुर्भरतवाक्यम्)

त्यक्त्वा नैर्घ्यं धरणिविबुधः स्वात्मविद्याविचारैः
प्राच्यां ख्यातिं भजतु पुनरप्यात्मनामानुरूपाम्।
वाणी सूरेर्न भवतु कदाप्याश्रवा काञ्चनानां
योगो भूयात् भुवि सरसयोरेव भव्योदयश्रीः ॥ ३० ॥

॥ समाप्तमिदं रूपकं विद्यानाथविडम्बनापरनामा प्रतापरुद्रविजयः ॥